# અધ્યાત્મરામાયણે અયોધ્યાકાણ્ડમ્

adhyAtmarAmAyaNe ayodhyAkANDam

sanskritdocuments.org

September 29, 2018

# adhyAtmarAmAyaNe ayodhyAkANDam

# અધ્યાત્મરામાયણે અયોધ્યાકાણ્ડમ્

## Sanskrit Document Information

Text title : adhyAtma rAmAyaNa ayodhyAkA.nDa

File name : adhyaatmaRamAyo.itx

Category : adhyAtmarAmAyaNa, raama

Location : doc_raama

Author : Traditional

Transliterated by : Nagaraj Balijepalli <nagaraj at iastate.edu>

Proofread by : Nagaraj Balijepalli, Sunder Httangadi, PSA Easwaran, ahimsasoldier

Latest update : july 22, 2006, April 4, 2015

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 29, 2018

*sanskritdocuments.org*

# અધ્યાત્મરામાયણે અયોધ્યાકાણ્ડમ્

## ॥ પ્રથમઃ સર્ગઃ ॥

એકદા સુખમાસીનં રામં સ્વાન્તઃપુરાજિરે ।
સર્વાભરણસમ્પન્નં રત્નસિંહાસને સ્થિતમ્ ॥ ૧॥

નીલોત્પલદલશ્યામં કૌસ્તુભામુક્તકન્ધરમ્ ।
સીતયા રત્નદણ્ડેન ચામરેણાથ વીજિતમ્ ॥ ૨॥

વિનોદયન્તં તામ્બૂલચર્વણાદિભિરાદરાત્ ।
નારદોઽવતરદ્દ્રષ્ટુમમ્બરાદ્યત્ર રાઘવઃ ॥ ૩॥

શુદ્ધસ્ફટિકસઙ્કાશઃ શરચ્ચન્દ્ર ઇવામલઃ ।
અતર્કિતમુપાયાતો નારદો દિવ્યદર્શનઃ ॥ ૪॥

તં દૃષ્ટ્વા સહસોત્થાય રામઃ પ્રીત્યા કૃતાઞ્જલિઃ ।
નનામ શિરસા ભૂમૌ સીતયા સહ ભક્તિમાન્ ॥ ૫॥

ઉવાચ નારદં રામઃ પ્રીત્યા પરમયા યુતઃ ।
સંસારિણાં મુનિશ્રેષ્ઠ દુર્લભં તવ દર્શનમ્ ।
અસ્માકં વિષયાસક્તચેતસાં નિતરાં મુને ॥ ૬॥

અવાપ્તં મે પૂર્વજન્મકૃતપુણ્યમહોદયૈઃ ।
સંસારિણાપિ હિ મુને લભ્યતે સત્સમાગમઃ ॥ ૭॥

અતસ્ત્વદ્દર્શનાદેવ કૃતાર્થોઽસ્મિ મુનીશ્વર ।
કિં કાર્યં તે મયા કાર્યં બ્રૂહિ તત્કરવાણિ ભોઃ ॥ ૮॥

અથ તં નારદોઽપ્યાહ રાઘવં ભક્તવત્સલમ્ ।
કિં મોહયસિ માં રામ વાક્યૈર્લોકાનુસારિભિઃ ॥ ૯॥

સંસાર્યહમિતિ પ્રોક્તં સત્યમેતત્ત્વયા વિભો ।
જગતામાદિભૂતા યા સા માયા ગૃહિણી તવ ॥ ૧૦॥

ત્વત્સન્નિકર્ષાજ્જાયન્તે તસ્યાં બ્રહ્માદયઃ પ્રજાઃ ।
ત્વદાશ્રયા સદા ભાતિ માયા યા ત્રિગુણાત્મિકા ॥ ૧૧॥

સૂતેઽજસ્રં શુક્લકૃષ્ણલોહિતાઃ સર્વદા પ્રજાઃ ।
લોકત્રયમહાગેહે ગૃહસ્થસ્ત્વમુદાહૃતઃ ॥ ૧૨॥

ત્વં વિષ્ણુર્જાનકી લક્ષ્મીઃ શિવસ્ત્વં જાનકી શિવા ।
બ્રહ્મા ત્વં જાનકી વાણી સૂર્યસ્ત્વં જાનકી પ્રભા ॥ ૧૩॥

ભવાન્ શશાઙ્કઃ સીતા તુ રોહિણી શુભલક્ષણા ।
શક્રસ્ત્વમેવ પૌલોમી સીતા સ્વાહાનલો ભવાન્ ॥ ૧૪॥

યમસ્ત્વં કાલરૂપશ્ચ સીતા સંયમિની પ્રભો ।
નિરૃતિસ્ત્વં જગન્નાથ તામસી જાનકી શુભા ॥ ૧૫॥

રામ ત્વમેવ વરુણો ભાર્ગવી જાનકી શુભા ।
વાયુસ્ત્વં રામ સીતા તુ સદાગતિરિતીરિતા ॥ ૧૬॥

કુબેરસ્ત્વં રામ સીતા સર્વસમ્પત્પ્રકીર્તિતા ।
રુદ્રાણી જાનકી પ્રોક્તા રુદ્રસ્ત્વં લોકનાશકૃત્ ॥ ૧૭॥

લોકે સ્ત્રીવાચકં યાવત્તત્સર્વં જાનકી શુભા ।
પુન્નામવાચકં યાવત્તત્સર્વં ત્વં હિ રાઘવ ॥ ૧૮॥

તસ્માલ્લોકત્રયે દેવ યુવાભ્યાં નાસ્તિ કિઞ્ચન ॥ ૧૯॥

ત્વદાભાસોદિતાજ્ઞાનમવ્યાકૃતમિતીર્યતે ।
તસ્માન્મહાન્સ્તતઃ સૂત્રં લિઙ્ગં સર્વાત્મકં તતઃ ॥ ૨૦॥

અહઙ્કારશ્ચ બુદ્ધિશ્ચ પઞ્ચપ્રાણેન્દ્રિયાણિ ચ ।
લિઙ્ગમિત્યુચ્યતે પ્રાજ્ઞૈર્જન્મમૃત્યુસુખાદિમત્ ॥ ૨૧॥

સ એવ જીવસઞ્જ્ઞશ્ચ લોકે ભાતિ જગન્મયઃ ।
અવાચ્યાનાદ્યવિદ્યૈવ કારણોપાધિરુચ્યતે ॥ ૨૨॥

સ્થૂલં સૂક્ષ્મં કારણાખ્યમુપાધિત્રિતયં ચિતેઃ ।
એતૈર્વિશિષ્ટો જીવઃ સ્યાદ્વિયુક્તઃ પરમેશ્વરઃ ॥ ૨૩॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યા સંસૃતિર્યા પ્રવર્તતે ।
તસ્યા વિલક્ષણઃ સાક્ષી ચિન્માત્રસ્ત્વં રઘૂત્તમ ॥ ૨૪॥

ત્વત્ત એવ જગજ્જાતં ત્વયિ સર્વં પ્રતિષ્ઠિતમ્ ।
ત્વય્યેવ લીયતે કૃત્સ્નં તસ્માત્ત્વં સર્વકારણમ્ ॥ ૨૫॥

રજ્જાવહિમિવાત્માનં જીવં જ્ઞાત્વા ભયં ભવેત્ ।
પરાત્માહમિતિ જ્ઞાત્વા ભયદુઃખૈર્વિમુચ્યતે ॥ ૨૬॥

ચિન્માત્રજ્યોતિષા સર્વાઃ સર્વદેહેષુ બુદ્ધયઃ ।
ત્વયા યસ્માત્પ્રકાશ્યન્તે સર્વસ્યાત્મા તતો ભવાન્ ॥ ૨૭॥

અજ્ઞાનાન્ન્યસ્યતે સર્વં ત્વયિ રજ્જૌ ભુજઙ્ગવત્ ॥ ૨૮॥

ત્વત્પાદભક્તિયુક્તાનાં વિજ્ઞાનં ભવતિ ક્રમાત્ ।
તસ્માત્ત્વદ્ભક્તિયુક્તા યે મુક્તિભાજસ્ત એવ હિ ॥ ૨૯॥

અહં ત્વદ્ભક્તભક્તાનાં તદ્ભક્તાનાં ચ કિઙ્કરઃ ।
અતો મામનુગૃહ્ણીષ્વ મોહયસ્વ ન માં પ્રભો ॥ ૩૦॥

ત્વન્નાભિકમલોત્પન્નો બ્રહ્મા મે જનકઃ પ્રભો ।
અતસ્તવાહં પૌત્રોઽસ્મિ ભક્તં માં પાહિ રાઘવ ॥ ૩૧॥

ઇત્યુક્ત્વા બહુશો નત્વા સ્વાનન્દાશ્રુપરિપ્લુતઃ ।
ઉવાચ વચનં રામ બ્રહ્મણા નોદિતોઽસ્મ્યહમ્ ॥ ૩૨॥

રાવણસ્ય વધાર્થાય જાતોઽસિ રઘુસત્તમ ।
ઇદાનીં રાજ્યરક્ષાર્થં પિતા ત્વામભિષેક્ષ્યતિ ॥ ૩૩॥

યદિ રાજ્યાભિસંસક્તો રાવણં ન હનિષ્યસિ ।
પ્રતિજ્ઞા તે કૃતા રામ ભૂભારહરણાય વૈ ॥ ૩૪॥

તત્સત્યં કુરુ રાજેન્દ્ર સત્યસન્ધસ્ત્વમેવ હિ ।
શ્રુત્વૈતદ્ગદિતં રામો નારદં પ્રાહ સસ્મિતમ્ ॥ ૩૫॥

શૃણુ નારદ મે કિઞ્ચિદ્વિદ્યતેઽવિદિતં ક્વચિત્ ।
પ્રતિજ્ઞાતં ચ યત્પૂર્વં કરિષ્યે તન્ન સંશયઃ ॥ ૩૬॥

કિન્તુ કાલાનુરોધેન તત્તત્પ્રારબ્ધસઙ્ક્ષયાત્ ।
હરિષ્યે સર્વભૂભારં ક્રમેણાસુરમણ્ડલમ્ ॥ ૩૭॥

રાવણસ્ય વિનાશાર્થં શ્વો ગન્તા દણ્ડકાનનમ્ ।
ચતુર્દશ સમાસ્તત્ર હ્યુષિત્વા મુનિવેષધૃક્ ॥ ૩૮॥

સીતામિષેણ તં દુષ્ટં સકુલં નાશયામ્યહમ્ ।
એવં રામે પ્રતિજ્ઞાતે નારદઃ પ્રમુમોદ હ ॥ ૩૯॥

પ્રદક્ષિણત્રયં કૃત્વા દણ્ડવત્પ્રણિપત્ય તમ્ ।
અનુજ્ઞાતશ્ચ રામેણ યયૌ દેવગતિં મુનિઃ ॥ ૪૦॥

સંવાદં પઠતિ શૃણોતિ સંસ્મરેદ્વા
યો નિત્યં મુનિવરરામયોઃ સભક્ત્યા ।
સમ્પ્રાપ્નોત્યમરસુદુર્લભં વિમોક્ષં
કૈવલ્યં વિરતિપુરઃસરં ક્રમેણ ॥ ૪૧॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અયોધ્યાકાણ્ડે પ્રથમઃ સર્ગઃ ॥ ૧॥

## ॥ દ્વિતીયઃ સર્ગઃ ॥

અથ રાજા દશરથઃ કદાચિદ્રહસિ સ્થિતઃ ।
વસિષ્ઠં સ્વકુલાચાર્યમાહૂયેદમભાષત ॥ ૧॥

ભગવન્ રામમખિલાઃ પ્રશંસન્તિ મુહુર્મુહુઃ ।
પૌરાશ્ચ નિગમા વૃદ્ધા મન્ત્રિણશ્ચ વિશેષતઃ ॥ ૨॥

તતઃ સર્વગુણોપેતં રામં રાજીવલોચનમ્ ।
જ્યેષ્ઠં રાજ્યેઽભિષેક્ષ્યામિ વૃદ્ધોઽહં મુનિપુઙ્ગવ ॥ ૩॥

ભરતો માતુલં દ્રષ્ટું ગતઃ શત્રુઘ્નસંયુતઃ ।
અભિષેક્ષ્યે શ્વ એવાશુ ભવાન્સ્તચ્ચાનુમોદતામ્ ॥ ૪॥

સમ્ભારાઃ સમ્ભ્રિયન્તાં ચ ગચ્છ મન્ત્રય રાઘવમ્ ।
ઉચ્છ્રીયન્તાં પતાકાશ્ચ નાનાવર્ણાઃ સમન્તતઃ ॥ ૫॥

તોરણાનિ વિચિત્રાણિ સ્વર્ણમુક્તામયાનિ વૈ ।
આહૂય મન્ત્રિણં રાજા સુમન્ત્રં મન્ત્રિસત્તમમ્ ॥૬॥

આજ્ઞાપયતિ યદ્યત્ત્વાં મુનિસ્તત્તત્સમાનય ।
યૌવરાજ્યેઽભિષેક્ષ્યામિ શ્વોભૂતે રઘુનન્દનમ્ ॥ ૭॥

તથેતિ હર્ષાત્સ મુનિં કિં કરોમીત્યભાષત ।

તમુવાચ મહાતેજા વસિષ્ઠો જ્ઞાનિનાં વરઃ ॥ ૮॥

શ્વઃ પ્રભાતે મધ્યકક્ષે કન્યકાઃ સ્વર્ણભૂષિતાઃ ।
તિષ્ઠન્તુ ષોડશ ગજાઃ સ્વર્ણરત્નાદિ ભૂષિતાઃ ॥ ૯॥

ચતુર્દન્તઃ સમાયાતુ ઐરાવતકુલોદ્ભવઃ ।
નાનાતીર્થોદકૈઃ પૂર્ણાઃ સ્વર્ણકુમ્ભાઃ સહસ્રશઃ ॥ ૧૦॥

સ્થાપ્યન્તાં નવવૈયાઘ્રચર્માણિ ત્રીણિ ચાનય ।
શ્વેતચ્છત્રં રત્નદણ્ડં મુક્તામણિવિરાજિતમ્ ॥ ૧૧॥

દિવ્યમાલ્યાનિ વસ્ત્રાણિ દિવ્યાન્યાભરણાનિ ચ ।
મુનયઃ સત્કૃતાસ્તત્ર તિષ્ઠન્તુ કુશપાણયઃ ॥ ૧૨॥

નર્તક્યો વારમુખ્યાશ્ચ ગાયકા વેણુકાસ્તથા ।
નાનાવાદિત્રકુશલા વાદયન્તુ નૃપાઙ્ગણે ॥ ૧૩॥

હસ્ત્યશ્વરથપાદાતા બહિસ્તિષ્ઠન્તુ સાયુધાઃ ।
નગરે યાનિ તિષ્ઠન્તિ દેવતાયતનાનિ ચ ॥ ૧૪॥

તેષુ પ્રવર્તતાં પૂજા નાનાબલિભિરાવૃતા ।
રાજાનઃ શીઘ્રમાયાન્તુ નાનોપાયનપાણયઃ ॥ ૧૫॥

ઇત્યાદિશ્ય મુનિઃ શ્રીમાન્ સુમન્ત્રં નૃપમન્ત્રિણમ્ ।
સ્વયં જગામ ભવનં રાઘવસ્યાતિશોભનમ્ ॥ ૧૬॥

રથમારુહ્ય ભગવાન્ વસિષ્ઠો મુનિસત્તમઃ ।
ત્રીણિ કક્ષાણ્યતિક્રમ્ય રથાત્ક્ષિતિમવાતરત્ ॥ ૧૭॥

અન્તઃ પ્રવિશ્ય ભવનં સ્વાચાર્યત્વાદવારિતઃ ।
ગુરુમાગતમાજ્ઞાય રામસ્તૂર્ણઃ કૃતાઞ્જલિઃ ॥ ૧૮॥

પ્રત્યુદ્ગમ્ય નમસ્કૃત્ય દણ્ડવદ્ભક્તિસંયુતઃ ।
સ્વર્ણપાત્રેણ પાનીયમાનિનાયાશુ જાનકી ॥ ૧૯॥

રત્નાસને સમાવેશ્ય પાદૌ પ્રક્ષાલ્ય ભક્તિતઃ ।
તદપઃ શિરસા ધૃત્વા સીતાયા સહ રાઘવઃ ॥ ૨૦॥

ધન્યોઽસ્મીત્યબ્રવીદ્રામસ્તવ પાદામ્બુધારણાત્ ।
શ્રીરામેણૈવમુક્તસ્તુ પ્રહસન્ મુનિરબ્રવીત્ ॥ ૨૧॥

ત્વત્પાદસલિલં ધૃત્વા ધન્યોઽભૂદ્ગિરિજાપતિઃ ।
બ્રહ્માપિ મત્પિતા તે હિ પાદતીર્થહતાશુભઃ ॥ ૨૨॥

ઇદાનીં ભાષસે યત્ત્વં લોકાનામુપદેશકૃત્ ।
જાનામિ ત્વાં પરાત્માનં લક્ષ્મ્યા સઞ્જાતમીશ્વરમ્ ॥ ૨૩॥

દેવકાર્યાર્થસિદ્ધ્યર્થં ભક્તાનાં ભક્તિસિદ્ધયે ।
રાવણસ્ય વધાર્થાય જાતં જાનામિ રાઘવ ॥ ૨૪॥

તથાપિ દેવકાર્યાર્થં ગુહ્યં નોદ્ઘાટયામ્યહમ્ ।
તથા ત્વં માયયા સર્વં કરોષિ રઘુનન્દન ॥ ૨૫॥

તથૈવાનુવિધાસ્યેઽહં શિષ્યસ્ત્વં ગુરુરપ્યહમ્ ।
ગુરુર્ગુરૂણાં ત્વં દેવ પિતૄણાં ત્વં પિતામહઃ ॥ ૨૬॥

અન્તર્યામી જગદ્યાત્રાવાહકસ્ત્વમગોચરઃ ।
શુદ્ધસત્ત્વમયં દેહં ધૃત્વા સ્વાધીનસમ્ભવમ્ ॥ ૨૭॥

મનુષ્ય ઇવ લોકેઽસ્મિન્ ભાસિ ત્વં યોગમાયયા ।
પૌરોહિત્યમહં જાને વિગર્હ્યં દૂષ્યજીવનમ્ ॥ ૨૮॥

ઇક્ષ્વાકૂણાં કુલે રામઃ પરમાત્મા જનિષ્યતે ।
ઇતિ જ્ઞાતં મયા પૂર્વં બ્રહ્મણા કથિતં પુરા ॥ ૨૯॥

તતોઽહમાશયા રામ તવ સમ્બન્ધકાઙ્ક્ષયા ।
અકાર્ષં ગર્હિતમપિ તવાચાર્યત્વસિદ્ધયે ॥ ૩૦॥

તતો મનોરથો મેઽદ્ય ફલિતો રઘુનન્દન ।
ત્વદધીના મહામાયા સર્વલોકૈકમોહિની ॥ ૩૧॥

માં યથા મોહયેન્નૈવ તથા કુરુ રઘૂદ્વહ ।
ગુરુનિષ્કૃતિકામસ્ત્વં યદિ દેહ્યેતદેવ મે ॥ ૩૨॥

પ્રસઙ્ગાત્સર્વમપ્યુક્તં ન વાચ્યં કુત્રચિન્મયા ।
રાજ્ઞા દશરથેનાહં પ્રેષિતોઽસ્મિ રઘૂદ્વહ ॥ ૩૩॥

ત્વામામન્ત્રયિતું રાજ્યે શ્વોઽભિષેક્ષ્યતિ રાઘવ ।
અદ્ય ત્વં સીતયા સાર્ધમુપવાસં યથાવિધિ ॥ ૩૪॥

કૃત્વા શુચિર્ભૂમિશાયી ભવ રામ જિતેન્દ્રિયઃ ।
ગચ્છામિ રાજસાન્નિધ્યં ત્વં તુ પ્રાતર્ગમિષ્યસિ ॥ ૩૫॥

ઇત્યુક્ત્વા રથમારુહ્ય યયૌ રાજગુરુર્દ્રુતમ્ ।
રામોઽપિ લક્ષ્મણં દૃષ્ટ્વા પ્રહસન્નિદમબ્રવીત્ ॥ ૩૬॥

સૌમિત્રે યૌવરાજ્યે મે શ્વોઽભિષેકો ભવિષ્યતિ ।
નિમિત્તમાત્રમેવાહં કર્તા ભોક્તા ત્વમેવ હિ ॥ ૩૭॥

મમ ત્વં હિ બહિઃપ્રાણો નાત્ર કાર્યા વિચારણા ।
તતો વસિષ્ઠેન યથા ભાષિતં તત્તથાકરોત્ ॥ ૩૮॥

વસિષ્ઠોઽપિ નૃપં ગત્વા કૃતં સર્વં ન્યવેદયત્ ।
વસિષ્ઠસ્ય પુરો રાજ્ઞા હ્યુક્તં રામાભિષેચનમ્ ॥ ૩૯॥

યદા તદૈવ નગરે શ્રુત્વા કશ્ચિત્પુમાન્ જગૌ ।
કૌસલ્યાયૈ રામમાત્રે સુમિત્રાયૈ તથૈવ ચ ॥ ૪૦॥

શ્રુત્વા તે હર્ષસમ્પૂર્ણે દદતુર્હારમુત્તમમ્ ।
તસ્મૈ તતઃ પ્રીતમનાઃ કૌસલ્યા પુત્રવત્સલા ॥ ૪૧॥

લક્ષ્મીં પર્યચરદ્દેવીં રામસ્યાર્થપ્રસિદ્ધયે ।
સત્યવાદી દશરથઃ કરોત્યેવ પ્રતિશ્રુતમ્ ॥ ૪૨॥

કૈકેયીવશગઃ કિન્તુ કામુકઃ કિં કરિષ્યતિ ।
ઇતિ વ્યાકુલચિત્તા સા દુર્ગાં દેવીમપૂજયત્ ॥ ૪૩॥

એતસ્મિન્નન્તરે દેવા દેવીં વાણીમચોદયન્ ।
ગચ્છ દેવિ ભુવો લોકમયોધ્યાયાં પ્રયત્નતઃ ॥ ૪૪॥

રામાભિષેકવિઘ્નાર્થં યતસ્વ બ્રહ્મવાક્યતઃ ।
મન્થરાં પ્રવિશસ્વાદૌ કૈકેયીં ચ તતઃ પરમ્ ॥ ૪૫॥

તતો વિઘ્ને સમુત્પન્ને પુનરેહિ દિવં શુભે ।
તથેત્યુક્ત્વા તથા ચક્રે પ્રવિવેશાથ મન્થરામ્ ॥ ૪૬॥

સાપિ કુબ્જા ત્રિવક્રા તુ પ્રાસાદાગ્રમથારુહત્ ।
નગરં પરિતો દૃષ્ટ્વા સર્વતઃ સમલઙ્કૃતમ્ ॥ ૪૭॥

નાનાતોરણસમ્બાધં પતાકાભિરલઙ્કૃતમ્ ।
સર્વોત્સવસમાયુક્તં વિસ્મિતા પુનરાગમત્ ॥ ૪૮॥

ધાત્રીં પપ્રચ્છ માતઃ કિં નગરં સમલઙ્કૃતમ્ ।

નાનોત્સવસમાયુક્તા કૌસલ્યા ચાતિહર્ષિતા ॥ ૪૯॥

દદાતિ વિપ્રમુખ્યેભ્યો વસ્ત્રાણિ વિવિધાનિ ચ ।
તામુવાચ તદા ધાત્રી રામચન્દ્રાભિષેચનમ્ ॥ ૫૦॥

શ્વો ભવિષ્યતિ તેનાદ્ય સર્વતોઽલઙ્કૃતં પુરમ્ ।
તચ્છ્રુત્વા ત્વરિતં ગત્વા કૈકેયીં વાક્યમબ્રવીત્ ॥ ૫૧॥

પર્યઙ્કસ્થાં વિશાલાક્ષીમેકાન્તે પર્યવસ્થિતામ્ ।
કિં શેષે દુર્ભગે મૂઢે મહદ્ભયમુપસ્થિતમ્ ॥ ૫૨॥

ન જાનીષેઽતિસૌન્દર્યમાનિની મત્તગામિની ॥ ૫૩॥

રામસ્યાનુગ્રહાદ્રાજ્ઞઃ શ્વોઽભિષેકો ભવિષ્યતિ ।
તચ્છ્રુત્વા સહસોત્થાય કૈકેયી પ્રિયવાદિની ॥ ૫૪॥

તસ્યૈ દિવ્યં દદૌ સ્વર્ણનૂપુરં રત્નભૂષિતમ્ ।
હર્ષસ્થાને કિમિતિ મે કથ્યતે ભયમાગતમ્ ॥ ૫૫॥

ભરતાદધિકો રામઃ પ્રિયકૃન્મે પ્રિયંવદઃ ।
કૌસલ્યાં માં સમં પશ્યન્ સદા શુશ્રૂષતે હિ મામ્ ॥ ૫૬॥

રામાદ્ભયં કિમાપન્નં તવ મૂઢે વદસ્વ મે ।
તચ્છ્રુત્વા વિષસાદાથ કુબ્જાઽકારણવૈરિણી ॥ ૫૭॥

શૃણુ મદ્વચનં દેવિ યથાર્થં તે મહદ્ભયમ્ ।
ત્વાં તોષયન્ સદા રાજા પ્રિયવાક્યાનિ ભાષતે ॥ ૫૮॥

કામુકોઽતથ્યવાદી ચ ત્વાં વાચા પરિતોષયન્ ।
કાર્યં કરોતિ તસ્યા વૈ રામમાતુઃ સુપુષ્કલમ્ ॥ ૫૯॥

મનસ્યેતન્નિધાયૈવ પ્રેષયામાસ તે સુતમ્ ।
ભરતં માતુલકુલે પ્રેષયામાસ સાનુજમ્ ॥ ૬૦॥

સુમિત્રાયાઃ સમીચીનં ભવિષ્યતિ ન સંશયઃ ।
લક્ષ્મણો રામમન્વેતિ રાજ્યં સોઽનુભવિષ્યતિ ॥ ૬૧॥

ભરતો રાઘવસ્યાગ્રે કિઙ્કરો વા ભવિષ્યતિ ।
વિવાસ્યતે વા નગરાત્પ્રાણૈર્વા હાપ્યતેઽચિરાત્ ॥ ૬૨॥

ત્વં તુ દાસીવ કૌસલ્યાં નિત્યં પરિચરિષ્યસિ ।

તતોઽપિ મરણં શ્રેયો યત્સપત્ન્યાઃ પરાભવઃ ॥ ૬૩॥

અતઃ શીઘ્રં યતસ્વાદ્ય ભરતસ્યાભિષેચને ।
રામસ્ય વનવાસાર્થં વર્ષાણિ નવ પઞ્ચ ચ ॥ ૬૪॥

તતો રૂઢોઽભયે પુત્રસ્તવ રાજ્ઞિ ભવિષ્યતિ ।
ઉપાયં તે પ્રવક્ષ્યામિ પૂર્વમેવ સુનિશ્ચિતમ્ ॥ ૬૫॥

પુરા દેવાસુરે યુદ્ધે રાજા દશરથઃ સ્વયમ્ ।
ઇન્દ્રેણ યાચિતો ધન્વી સહાયાર્થં મહારથઃ ॥ ૬૬॥

જગામ સેનયા સાર્ધં ત્વયા સહ શુભાનને ।
યુદ્ધં પ્રકુર્વતસ્તસ્ય રાક્ષસૈઃ સહ ધન્વિનઃ ॥ ૬૭॥

તદાક્ષકીલો ન્યપતચ્છિન્નસ્તસ્ય ન વેદ સઃ ।
ત્વં તુ હસ્તં સમાવેશ્ય કીલરન્ધ્રેઽતિધૈર્યતઃ ॥ ૬૮॥

સ્થિતવત્યસિતાપાઙ્ગિ પતિપ્રાણપરીપ્સયા ।
તતો હત્વાસુરાન્ સર્વાન્ દદર્શ ત્વામરિન્દમઃ ॥ ૬૯॥

આશ્ચર્યં પરમં લેભે ત્વામાલિઙ્ગ્ય મુદાન્વિતઃ ।
વૃણીષ્વ યત્તે મનસિ વાઞ્છિતં વરદોઽસ્મ્યહમ્ ॥ ૭૦॥

વરદ્વયં વૃણીષ્વ ત્વમેવં રાજાવદત્સ્વયમ્ ।
ત્વયોક્તો વરદો રાજન્ યદિ દત્તં વરદ્વયમ્ ॥ ૭૧॥

ત્વય્યેવ તિષ્ઠતુ ચિરં ન્યાસભૂતં મમાનઘ ।
યદા મેઽવસરો ભૂયાત્તદા દેહિ વરદ્વયમ્ ॥ ૭૨॥

તથેત્યુક્ત્વા સ્વયં રાજા મન્દિરં વ્રજ સુવ્રતે ।
ત્વત્તઃ શ્રુતં મયા પૂર્વમિદાનીં સ્મૃતિમાગતમ્ ॥ ૭૩॥

અતઃ શીઘ્રં પ્રવિશ્યાદ્ય ક્રોધાગારં રુષાન્વિતા ।
વિમુચ્ય સર્વાભરણં સર્વતો વિનિકીર્ય ચ ॥ ૭૪॥

ભૂમાવેવ શયાના ત્વં તૂષ્ણીમાતિષ્ઠ ભામિનિ ।
યાવત્સત્યં પ્રતિજ્ઞાય રાજાભીષ્ટં કરોતિ તે ॥ ૭૫॥

શ્રુત્વા ત્રિવક્રયોક્તં તત્તદા કેકયનન્દિની ।
તથ્યમેવાખિલં મેને દુઃસઙ્ગાહિતવિભ્રમા ॥ ૭૬॥

તામાહ કૈકેયી દુષ્ટા કુતસ્તે બુદ્ધિરીદૃશી ।
એવં ત્વાં બુદ્ધિસમ્પન્નાં ન જાને વક્રસુન્દરિ ॥ ૭૭॥

ભરતો યદિ રાજા મે ભવિષ્યતિ સુતઃ પ્રિયઃ ।
ગ્રામાન્ શતં પ્રદાસ્યામિ મમ ત્વં પ્રાણવલ્લભા ॥ ૭૮॥

ઇત્યુક્ત્વા કોપભવનં પ્રવિશ્ય સહસા રુષા ।
વિમુચ્ય સર્વાભરણં પરિકીર્ય સમન્તતઃ ॥ ૭૯॥

ભૂમૌ શયાના મલિના મલિનામ્બરધારિણી ।
પ્રોવાચ શૃણુ મે કુબ્જે યાવદ્રામો વનં વ્રજેત્ ॥ ૮૦॥

પ્રાણાન્સ્ત્યક્ષ્યેઽથ વા વક્રે શયિષ્યે તાવદેવ હિ ।
નિશ્ચયં કુરુ કલ્યાણિ કલ્યાણં તે ભવિષ્યતિ ॥ ૮૧॥

ઇત્યુક્ત્વા પ્રયયૌ કુબ્જા ગૃહં સાઽપિ તથાકરોત્ ॥ ૮૨॥

ધીરોઽત્યન્તદયાન્વિતોઽપિ સગુણાચારાન્વિતો વાથવા
નીતિજ્ઞો વિધિવાદદેશિકપરો વિદ્યાવિવેકોઽથવા ।
દુષ્ટાનામતિપાપભાવિતધિયાં સઙ્ગં સદા ચેદ્ભજેત્
તદ્બુદ્ધ્યા પરિભાવિતો વ્રજતિ તત્સામ્યં ક્રમેણ સ્ફુટમ્ ॥૮૩॥

અતઃ સઙ્ગઃ પરિત્યાજ્યો દુષ્ટાનાં સર્વદૈવ હિ ।
દુઃસઙ્ગી ચ્યવતે સ્વાર્થાદ્યથેયં રાજકન્યકા ॥ ૮૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અયોધ્યાકાણ્ડે દ્વિતીયઃ સર્ગઃ ॥ ૨॥

## ॥ તૃતીયઃ સર્ગઃ ॥

તતો દશરથો રાજા રામાભ્યુદયકારણાત્ ।
આદિશ્ય મન્ત્રિપ્રકૃતીઃ સાનન્દો ગૃહમાવિશત્ ॥ ૧॥

તત્રાદૃષ્ટ્વા પ્રિયાં રાજા કિમેતદિતિ વિહ્વલઃ ।
યા પુરા મન્દિરં તસ્યાઃ પ્રવિષ્ટે મયિ શોભના ॥ ૨॥

હસન્તી મામુપાયાતિ સા કિં નૈવાદ્ય દૃશ્યતે ।
ઇત્યાત્મન્યેવ સઞ્ચિન્ત્ય મનસાતિવિદૂયતા ॥ ૩॥

પપ્રચ્છ દાસીનિકરં કુતો વઃ સ્વામિની શુભા ।
નાયાતિ માં યથાપૂર્વં મત્પ્રિયા પ્રિયદર્શના ॥ ૪॥

તા ઊચુઃ ક્રોધભવનં પ્રવિષ્ટા નૈવ વિદ્મહે ।
કારણં તત્ર દેવ ત્વં ગચ્છ નિશ્ચેતુમર્હસિ ॥ ૫॥

ઇત્યુક્તો ભયસન્ત્રસ્તો રાજા તસ્યાઃ સમીપગઃ ।
ઉપવિશ્ય શનૈર્દેહં સ્પૃશન્વૈ પાણિનાબ્રવીત્ ॥ ૬॥

કિં શેષે વસુધાપૃષ્ઠે પર્યઙ્કાદીન્ વિહાય ચ ।
માં ત્વં ખેદયસે ભીરુ યતો માં નાવભાષસે ॥ ૭॥

અલઙ્કારં પરિત્યજ્ય ભૂમૌ મલિનવાસસા ।
કિમર્થં બ્રૂહિ સકલં વિધાસ્યે તવ વાઞ્છિતમ્ ॥ ૮॥

કો વા તવાહિતં કર્તા નારી વા પુરુષોઽપિ વા ।
સ મે દણ્ડ્યશ્ચ વધ્યશ્ચ ભવિષ્યતિ ન સંશયઃ ॥ ૯॥

બ્રૂહિ દેવિ યથા પ્રીતિસ્તદવશ્યં મમાગ્રતઃ ।
તદિદાનીં સાધયિષ્યે સુદુર્લભમપિ ક્ષણાત્ ॥ ૧૦॥

જાનાસિ ત્વં મમ સ્વાન્તં પ્રિયં માં સ્વવશે સ્થિતમ્ ।
તથાપિ માં ખેદયસે વૃથા તવ પરિશ્રમઃ ॥ ૧૧॥

બ્રૂહિ કિં ધનિનં કુર્યાં દરિદ્રં તે પ્રિયઙ્કરમ્ ।
ધનિનં ક્ષણમાત્રેણ નિર્ધનં ચ તવાહિતમ્ ॥ ૧૨॥

બ્રૂહિ કં વા વધિષ્યામિ વધાર્હો વા વિમોક્ષ્યતે ।
કિમત્ર બહુનોક્તેન પ્રાણાન્ દાસ્યામિ તે પ્રિયે ॥ ૧૩॥

મમ પ્રાણાત્પ્રિયતરો રામો રાજીવલોચનઃ ।
તસ્યોપરિ શપે બ્રૂહિ ત્વદ્ધિતં તત્કરોમ્યહમ્ ॥ ૧૪॥

ઇતિ બ્રુવાણં રાજાનં શપન્તં રાઘવોપરિ ।
શનૈર્વિમૃજ્ય નેત્રે સા રાજાનં પ્રત્યભાષત ॥ ૧૫॥

યદિ સત્યપ્રતિજ્ઞોઽસિ શપથં કુરુષે યદિ ।
યાચ્ઞાં મે સફલાં કર્તું શીઘ્રમેવ ત્વમર્હસિ ॥ ૧૬॥

પૂર્વં દેવાસુરે યુદ્ધે મયા ત્વં પરિરક્ષિતઃ ।

તદા વરદ્વયં દત્તં ત્વયા મે તુષ્ટચેતસા ॥ ૧૭॥

તદ્દ્વયં ન્યાસભૂતં મે સ્થાપિતં ત્વયિ સુવ્રત ।
તત્રૈકેન વરેણાશુ ભરતં મે પ્રિયં સુતમ્ ॥ ૧૮॥

એભિઃ સમ્ભૃતસમ્ભારૈર્યૌવરાજ્યેઽભિષેચય ।
અપરેણ વરેણાશુ રામો ગચ્છતુ દણ્ડકાન્ ॥ ૧૯॥

મુનિવેષધરઃ શ્રીમાન્ જટાવલ્કલભૂષણઃ ।
ચતુર્દશ સમાસ્તત્ર કન્દમૂલફલાશનઃ ॥ ૨૦॥

પુનરાયાતુ તસ્યાન્તે વને વા તિષ્ઠતુ સ્વયમ્ ।
પ્રભાતે ગચ્છતુ વનં રામો રાજીવલોચનઃ ॥ ૨૧॥

યદિ કિઞ્ચિદ્વિલમ્બેત પ્રાણાન્સ્ત્યક્ષ્યે તવાગ્રતઃ ।
ભવ સત્યપ્રતિજ્ઞસ્ત્વમેતદેવ મમ પ્રિયમ્ ॥ ૨૨॥

શ્રુત્વૈતદ્દારુણં વાક્યં કૈકેય્યા રોમહર્ષણમ્ ।
નિપપાત મહીપાલો વજ્રાહત ઇવાચલઃ ॥ ૨૩॥

શનૈરુન્મીલ્ય નયને વિમૃજ્ય પરયા ભિયા ।
દુઃસ્વપ્નો વા મયા દૃષ્ટો હ્યથવા ચિત્તવિભ્રમઃ ॥ ૨૪॥

ઇત્યાલોક્ય પુરઃ પત્નીં વ્યાઘ્રીમિવ પુરઃ સ્થિતામ્ ।
કિમિદં ભાષસે ભદ્રે મમ પ્રાણહરં વચઃ ॥ ૨૫॥

રામઃ કમપરાધં તે કૃતવાન્ કમલેક્ષણઃ ।
મમાગ્રે રાઘવગુણાન્ વર્ણયસ્યનિશં શુભાન્ ॥ ૨૬॥

કૌસલ્યાં માં સમં પશ્યન્ શુશ્રૂષા કુરુતે સદા ।
ઇતિ બ્રુવન્તી ત્વં પૂર્વમિદાનીં ભાષસેઽન્યથા ॥ ૨૭॥

રાજ્યં ગૃહાણ પુત્રાય રામસ્તિષ્ઠતુ મન્દિરે ।
અનુગૃહ્ણીષ્વ માં વામે રામાન્નાસ્તિ ભયં તવ ॥ ૨૮॥

ઇત્યુક્ત્વાશ્રુપરીતાક્ષઃ પાદયોર્નિપપાત હ ।
કૈકેયી પ્રત્યુવાચેદં સાપિ રક્તાન્તલોચના ॥ ૨૯॥

રાજેન્દ્ર કિં ત્વં ભ્રાન્તોઽસિ ઉક્તં તદ્ભાષસેઽન્યથા ।
મિથ્યા કરોષિ ચેત્સ્વીયં ભાષિતં નરકો ભવેત્ ॥ ૩૦॥

વનં ન ગચ્છેદ્યદિ રામચન્દ્રઃ
પ્રભાતકાલેઽજિનચીરયુક્તઃ ।
ઉદ્બન્ધનં વા વિષભક્ષણં વા
કૃત્વા મરિષ્યે પુરતસ્તવાહમ્ ॥ ૩૧॥

સત્યપ્રતિજ્ઞોઽહમિતીહ લોકે
વિડમ્બસે સર્વસભાન્તરેષુ ।
રામોપરિ ત્વં શપથં ચ કૃત્વા
મિથ્યાપ્રતિજ્ઞો નરકં પ્રયાહિ ॥ ૩૨॥

ઇત્યુક્તઃ પ્રિયયા દીનો મગ્નો દુઃખાર્ણવે નૃપઃ ।
મૂર્ચ્છિતઃ પતિતો ભૂમૌ વિસઙ્જ્ઞો મૃતકો યથા ॥ ૩૩॥

એવં રાત્રિર્ગતા તસ્ય દુઃખાત્સંવત્સરોપમા ।
અરુણોદયકાલે તુ વન્દિનો ગાયકા જગુઃ ॥ ૩૪॥

નિવારયિત્વા તાન્ સર્વાન્ કૈકેયી રોષમાસ્થિતા ।
તતઃ પ્રભાતસમયે મધ્યકક્ષમુપસ્થિતાઃ ॥ ૩૫॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા ઋષયઃ કન્યકાસ્તથા ।
છત્રં ચ ચામરં દિવ્યં ગજો વાજી તથૈવ ચ ॥ ૩૬॥

અન્યાશ્ચ વારમુખ્યા યાઃ પૌરજાનપદાસ્તથા ।
વસિષ્ઠેન યથાજ્ઞપ્તં તત્સર્વં તત્ર સંસ્થિતમ્ ॥ ૩૭॥

સ્ત્રિયો બાલાશ્ચ વૃદ્ધાશ્ચ રાત્રૌ નિદ્રાં ન લેભિરે ।
કદા દ્રક્ષ્યામહે રામં પીતકૌશેયવાસસમ્ ॥ ૩૮॥

સર્વાભરણસમ્પન્નં કિરીટકટકોજ્જ્વલમ્ ।
કૌસ્તુભાભરણં શ્યામં કન્દર્પશતસુન્દરમ્ ॥ ૩૯॥

અભિષિક્તં સમાયાતં ગજારૂઢં સ્મિતાનનમ્ ।
શ્વેતચ્છત્રધરં તત્ર લક્ષ્મણં લક્ષણાન્વિતમ્ ॥ ૪૦॥

રામં કદા વા દ્રક્ષ્યામઃ પ્રભાતં વા કદા ભવેત્ ।
ઇત્યુત્સુકધિયઃ સર્વે બભૂવુઃ પુરવાસિનઃ ॥ ૪૧॥

નેદાનીમુત્થિતો રાજા કિમર્થં ચેતિ ચિન્તયન્ ।
સુમન્ત્રઃ શનકૈઃ પ્રાયાદ્યત્ર રાજાઽવતિષ્ઠતે ॥ ૪૨॥

વર્ધયન્ જયશબ્દેન પ્રણમન્ શિરસા નૃપમ્ ।
અતિખિન્નં નૃપં દૃષ્ટ્વા કૈકેયીં સમપૃચ્છત ॥ ૪૩॥

દેવિ કૈકેયિ વર્ધસ્વ કિં રાજા દૃશ્યતેઽન્યથા ।
તમાહ કૈકેયી રાજા રાત્રૌ નિદ્રાં ન લબ્ધવાન્ ॥ ૪૪॥

રામ રામેતિ રામેતિ રામમેવાનુચિન્તયન્ ।
પ્રજાગરેણ વૈ રાજા હ્યસ્વસ્થ ઇવ લક્ષ્યતે ।
રામમાનય શીઘ્રં ત્વં રાજા દ્રષ્ટુમિહેચ્છતિ ॥ ૪૫॥

અશ્રુત્વા રાજવચનં કથં ગચ્છામિ ભામિનિ ।
તચ્છ્રુત્વા મન્ત્રિણો વાક્યં રાજા મન્ત્રિણમબ્રવીત્ ॥ ૪૬॥

સુમન્ત્ર રામં દ્રક્ષ્યામિ શીઘ્રમાનય સુન્દરમ્ ।
ઇત્યુક્તસ્ત્વરિતં ગત્વા સુમન્ત્રો રામમન્દિરમ્ ॥ ૪૭॥

અવારિતઃ પ્રવિષ્ટોઽયં ત્વરિતં રામમબ્રવીત્ ।
શીઘ્રમાગચ્છ ભદ્રં તે રામ રાજીવલોચન ॥ ૪૮॥

પિતુર્ગેહં મયા સાર્ધં રાજા ત્વાં દ્રષ્ટુમિચ્છતિ ।
ઇત્યુક્તો રથમારુહ્ય સમ્ભ્રમાત્ત્વરિતો યયૌ ॥ ૪૯॥

રામઃ સારથિના સાર્ધં લક્ષ્મણેન સમન્વિતઃ ।
મધ્યકક્ષે વસિષ્ઠાદીન્ પશ્યન્નેવ ત્વરાન્વિતઃ ॥ ૫૦॥

પિતુઃ સમીપં સઙ્ગમ્ય નનામ ચરણૌ પિતુઃ ।
રામમાલિઙ્ગિતું રાજા સમુત્થાય સસમ્ભ્રમઃ ॥ ૫૧॥

બાહૂ પ્રસાર્ય રામેતિ દુઃખાન્મધ્યે પપાત હ ।
હા હેતિ રામસ્તં શીઘ્રમાલિઙ્ગ્યાઙ્કે ન્યવેશયત્ ॥ ૫૨॥

રાજાનં મૂર્ચ્છિતં દૃષ્ટ્વા ચુક્રુશુઃ સર્વયોષિતઃ ।
કિમર્થં રોદનમિતિ વસિષ્ઠોઽપિ સમાવિશત્ ॥ ૫૩॥

રામઃ પપ્રચ્છ કિમિદં રાજ્ઞો દુઃખસ્ય કારણમ્ ।
એવં પૃચ્છતિ રામે સા કૈકેયી રામમબ્રવીત્ ॥ ૫૪॥

ત્વમેવ કારણં હ્યત્ર રાજ્ઞો દુઃખોપશાન્તયે ।
કિઞ્ચિત્કાર્યં ત્વયા રામ કર્તવ્યં નૃપતેર્હિતમ્ ॥ ૫૫॥

કુરુ સત્યપ્રતિજ્ઞસ્ત્વં રાજાનં સત્યવાદિનમ્ ।

રાજ્ઞા વરદ્વયં દત્તં મમ સન્તુષ્ટચેતસા ॥ ૫૬॥

ત્વદધીનં તુ તત્સર્વં વક્તું ત્વાં લજ્જતે નૃપઃ ।
સત્યપાશેન સમ્બદ્ધં પિતરં ત્રાતુમર્હસિ ॥ ૫૭॥

પુત્રશબ્દેન ચૈતદ્ધિ નરકાત્ત્રાયતે પિતા ।
રામસ્તયોદિતં શ્રુત્વા શૂલેનાભિહતો યથા ॥ ૫૮॥

વ્યથિતઃ કૈકેયીં પ્રાહ કિં મામેવં પ્રભાષસે ।
પિત્રર્થે જીવિતં દાસ્યે પિબેયં વિષમુલ્બણમ્ ॥ ૫૯॥

સીતાં ત્યક્ષ્યેઽથ કૌસલ્યાં રાજ્યં ચાપિ ત્યજામ્યહમ્ ।
અનાજ્ઞપ્તોઽપિ કુરુતે પિતુઃ કાર્યં સ ઉત્તમઃ ॥ ૬૦॥

ઉક્તઃ કરોતિ યઃ પુત્રઃ સ મધ્યમ ઉદાહૃતઃ ।
ઉક્તોઽપિ કુરુતે નૈવ સ પુત્રો મલ ઉચ્યતે ॥ ૬૧॥

અતઃ કરોમિ તત્સર્વં યન્મામાહ પિતા મમ ।
સત્યં સત્યં કરોમ્યેવ રામો દ્વિર્નાભિભાષતે ॥ ૬૨॥

ઇતિ રામપ્રતિજ્ઞાં સા શ્રુત્વા વક્તું પ્રચક્રમે ।
રામ ત્વદભિષેકાર્થં સમ્ભારાઃ સમ્ભૃતાશ્ચ યે ॥ ૬૩॥

તૈરેવ ભરતોઽવશ્યમભિષેચ્યઃ પ્રિયો મમ ।
અપરેણ વરેણાશુ ચીરવાસા જટાધરઃ ॥ ૬૪॥

વનં પ્રયાહિ શીઘ્રં ત્વમદ્યૈવ પિતુરાજ્ઞયા ।
ચતુર્દશ સમાસ્તત્ર વસ મુન્યન્નભોજનઃ ॥ ૬૫॥

એતદેવ પિતુસ્તેઽદ્ય કાર્યં ત્વં કર્તુમર્હસિ ।
રાજા તુ લજ્જતે વક્તું ત્વામેવં રઘુનન્દન ॥ ૬૬॥

શ્રીરામ ઉવાચ
ભરતસ્યૈવ રાજ્યં સ્યાદહં ગચ્છામિ દણ્ડકાન્ ।
કિન્તુ રાજા ન વક્તીહ માં ન જાનેઽત્ર કારણમ્ ॥ ૬૭॥

શ્રુત્વૈતદ્રામવચનં દૃષ્ટ્વા રામં પુરઃ સ્થિતમ્ ।
પ્રાહ રાજા દશરથો દુઃખિતો દુઃખિતં વચઃ ॥ ૬૮॥

સ્ત્રીજિતં ભ્રાન્તહૃદયમુન્માર્ગપરિવર્તિનમ્ ।
નિગૃહ્ય માં ગૃહાણેદં રાજ્યં પાપં ન તદ્ભવેત્ ॥ ૬૯॥

એવં ચેદનૃતં નૈવ માં સ્પૃશેદ્રઘુનન્દન ।
ઇત્યુક્ત્વા દુઃખસન્તપ્તો વિલલાપ નૃપસ્તદા ॥ ૭૦॥

હા રામ હા જગન્નાથ હા મમ પ્રાણવલ્લભ ।
માં વિસૃજ્ય કથં ઘોરં વિપિનં ગન્તુમર્હસિ ॥ ૭૧॥

ઇતિ રામં સમાલિઙ્ગ્ય મુક્તકણ્ઠો રુરોદ હ ।
વિમૃજ્ય નયને રામઃ પિતુઃ સજલપાણિના ॥ ૭૨॥

આશ્વાસયામાસ નૃપં શનૈઃ સ નયકોવિદઃ ।
કિમત્ર દુઃખેન વિભો રાજ્યં શાસતુ મેઽનુજઃ ॥ ૭૩॥

અહં પ્રતિજ્ઞાં નિસ્તીર્ય પુનર્યાસ્યામિ તે પુરમ્ ।
રાજ્યાત્કોટિગુણં સૌખ્યં મમ રાજન્ વને સતઃ ॥ ૭૪॥

ત્વત્સત્યપાલનં દેવ કાર્યં ચાપિ ભવિષ્યતિ ।
કૈકેય્યાશ્ચ પ્રિયો રાજન્ વનવાસો મહાગુણઃ ॥ ૭૫॥

ઇદાનીં ગન્તુમિચ્છામિ વ્યેતુ માતુશ્ચ હૃજ્જ્વરઃ ।
સમ્ભારશ્ચોપહ્રીયન્તામભિષેકાર્થમાહૃતાઃ ॥ ૭૬॥

માતરં સમનુશ્વાસ્ય અનુનીય ચ જાનકીમ્ ।
આગત્ય પાદૌ વન્દિત્વા તવ યાસ્યે સુખં વનમ્ ॥ ૭૭॥

ઇત્યુક્ત્વા તુ પરિક્રમ્ય માતરં દ્રષ્ટુમાયયૌ ।
કૌસલ્યાપિ હરેઃ પૂજાં કુરુતે રામકારણાત્ ॥ ૭૮॥

હોમં ચ કારયામાસ બ્રાહ્મણેભ્યો દદૌ ધનમ્ ।
ધ્યાયતે વિષ્ણુમેકાગ્રમનસા મૌનમાસ્થિતા ॥ ૭૯॥

અન્તઃસ્થમેકં ઘનચિત્પ્રકાશં
નિરસ્તસર્વાતિશયસ્વરૂપમ્ ।
વિષ્ણું સદાનન્દમયં હૃદબ્જે
સા ભાવયન્તી ન દદર્શ રામમ્ ॥ ૮૦॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અયોધ્યાકાણ્ડે તૃતીયઃ સર્ગઃ ॥ ૩॥

## ॥ ચતુર્થઃ સર્ગઃ ॥

તતઃ સુમિત્રા દૃષ્ટ્વૈનં રામં રાજ્ઞીં સસમ્ભ્રમા ।
કૌસલ્યાં બોધયામાસ રામોઽયં સમુપસ્થિતઃ ॥ ૧॥

શ્રુત્વૈવ રામનામૈષા બહિર્દૃષ્ટિપ્રવાહિતા ।
રામં દૃષ્ટ્વા વિશાલાક્ષમાલિઙ્ગ્યાઙ્કે ન્યવેશયત્ ॥ ૨॥

મૂર્ધ્ન્યવઘ્રાય પસ્પર્શ ગાત્રં નીલોત્પલચ્છવિ ।
ભુઙ્ક્ષ્વ પુત્રેતિ ચ પ્રાહ મિષ્ટમન્નં ક્ષુધાર્દિતઃ ॥ ૩॥

રામઃ પ્રાહ ન મે માતર્ભોજનાવસરઃ કુતઃ ।
દણ્ડકાગમને શીઘ્રં મમ કાલોઽદ્ય નિશ્ચિતઃ ॥ ૪॥

કૈકેયીવરદાનેન સત્યસન્ધઃ પિતા મમ ।
ભરતાય દદૌ રાજ્યં મમાપ્યારણ્યમુત્તમમ્ ॥ ૫॥

ચતુર્દશ સમાસ્તત્ર હ્યુષિત્વા મુનિવેષધૃક્ ।
આગમિષ્યે પુનઃ શીઘ્રં ન ચિન્તાં કર્તુમર્હસિ ॥ ૬॥

તચ્છ્રુત્વા સહસોદ્વિગ્ના મૂર્ચ્છિતા પુનરુત્થિતા ।
આહ રામં સુદુઃખાર્તા દુઃખસાગરસમ્પ્લુતા ॥ ૭॥

યદિ રામ વનં સત્યં યાસિ ચેન્નય મામપિ ।
ત્વદ્વિહીના ક્ષણાર્ધં વા જીવિતં ધારયે કથમ્ ॥ ૮॥

યથા ગૌર્બાલકં વત્સં ત્યક્ત્વા તિષ્ઠેન્ન કુત્રચિત્ ।
તથૈવ ત્વાં ન શક્નોમિ ત્યક્તું પ્રાણાત્પ્રિયં સુતમ્ ॥ ૯॥

ભરતાય પ્રસન્નશ્ચેદ્રાજ્યં રાજા પ્રયચ્છતુ ।
કિમર્થં વનવાસાય ત્વામાજ્ઞાપયતિ પ્રિયમ્ ॥ ૧૦॥

કૈકેય્યા વરદો રાજા સર્વસ્વં વા પ્રયચ્છતુ ।
ત્વયા કિમપરાદ્ધં હિ કૈકેય્યા વા નૃપસ્ય વા ॥ ૧૧॥

પિતા ગુરુર્યથા રામ તવાહમધિકા તતઃ ।
પિત્રાઽઽજ્ઞપ્તો વનં ગન્તું વારયેયમહં સુતમ્ ॥ ૧૨॥

યદિ ગચ્છસિ મદ્વાક્યમુલ્લઙ્ઘ્ય નૃપવાક્યતઃ ।
તદા પ્રાણાન્ પરિત્યજ્ય ગચ્છામિ યમસાદનમ્ ॥ ૧૩॥

લક્ષ્મણોઽપિ તતઃ શ્રુત્વા કૌસલ્યાવચનં રુષા ।
ઉવાચ રાઘવં વીક્ષ્ય દહન્નિવ જગત્ત્રયમ્ ॥ ૧૪॥

ઉન્મત્તં ભ્રાન્તમનસં કૈકેયીવશવર્તિનમ્ ।
બદ્ધ્વા નિહન્મિ ભરતં તદ્બન્ધૂન્માતુલાનપિ ॥ ૧૫॥

અદ્ય પશ્યન્તુ મે શૌર્યં લોકાન્ પ્રદહતઃ પુરા ।
રામ ત્વમભિષેકાય કુરુ યત્નમરિન્દમ ॥ ૧૬॥

ધનુષ્પાણિરહં તત્ર નિહન્યાં વિઘ્નકારિણઃ ।
ઇતિ બ્રુવન્તં સૌમિત્રિમાલિઙ્ગ્ય રઘુનન્દનઃ ॥ ૧૭॥

શૂરોઽસિ રઘુશાર્દૂલ મમાત્યન્તહિતે રતઃ ।
જાનામિ સર્વં તે સત્યં કિન્તુ તત્સમયો ન હિ ॥ ૧૮॥

યદિદં દૃશ્યતે સર્વં રાજ્યં દેહાદિકં ચ યત્ ।
યદિ સત્યં ભવેત્તત્ર આયાસઃ સફલશ્ચ તે ॥ ૧૯॥

ભોગા મેઘવિતાનસ્થવિદ્યુલ્લેખેવ ચઞ્ચલાઃ ।
આયુરપ્યગ્નિસન્તપ્તલોહસ્થજલબિન્દુવત્ ॥ ૨૦॥

યથા વ્યાલગલસ્થોઽપિ ભેકો દંશાનપેક્ષતે ।
તથા કાલાહિના ગ્રસ્તો લોકો ભોગાનશાશ્વતાન્ ॥ ૨૧॥

કરોતિ દુઃખેન હિ કર્મતન્ત્રં
શરીરભોગાર્થમહર્નિશં નરઃ ।
દેહસ્તુ ભિન્નઃ પુરુષાત્સમીક્ષ્યતે
કો વાત્ર ભોગઃ પુરુષેણ ભુજ્યતે ॥ ૨૨॥

પિતૃમાતૃસુતભ્રાતૃદારબન્ધ્વાદિસઙ્ગમઃ ।
પ્રપાયામિવ જન્તૂનાં નદ્યાં કાષ્ઠૌઘવચ્ચલઃ ॥ ૨૩॥

છાયેવ લક્ષ્મીશ્ચપલા પ્રતીતા
તારુણ્યમમ્બૂર્મિવદધ્રુવં ચ ।
સ્વપ્નોપમં સ્ત્રીસુખમાયુરલ્પં
તથાપિ જન્તોરભિમાન એષઃ ॥ ૨૪॥

સંસૃતિઃ સ્વપ્નસદૃશી સદા રોગાદિસઙ્કુલા ।

ગન્ધર્વનગરપ્રખ્યા મૂઢસ્તામનુવર્તતે ॥ ૨૫॥

આયુષ્યં ક્ષીયતે યસ્માદાદિત્યસ્ય ગતાગતૈઃ ।
દૃષ્ટ્વાન્યેષાં જરામૃત્યૂ કથઞ્ચિન્નૈવ બુધ્યતે ॥ ૨૬॥

સ એવ દિવસઃ સૈવ રાત્રિરિત્યેવ મૂઢધીઃ ।
ભોગાનનુપતત્યેવ કાલવેગં ન પશ્યતિ ॥ ૨૭॥

પ્રતિક્ષણં ક્ષરત્યેતદાયુરામઘટામ્બુવત્ ।
સપત્ના ઇવ રોગૌઘાઃ શરીરં પ્રહરન્ત્યહો ॥ ૨૮॥

જરા વ્યાઘ્રીવ પુરતસ્તર્જયન્ત્યવતિષ્ઠતે ।
મૃત્યુઃ સહૈવ યાત્યેષ સમયં સમ્પ્રતીક્ષતે ॥ ૨૯॥

દેહેઽહમ્ભાવમાપન્નો રાજાહં લોકવિશ્રુતઃ ।
ઇત્યસ્મિન્મનુતે જન્તુઃ કૃમિવિડ્ભસ્મસઞ્જ્ઞિતે ॥ ૩૦॥

ત્વગસ્થિમાન્સવિણ્મૂત્રરેતોરક્તાદિસંયુતઃ ।
વિકારી પરિણામી ચ દેહ આત્મા કથં વદ ॥ ૩૧॥

યમાસ્થાય ભવાન્લ્લોકં દગ્ધુમિચ્છતિ લક્ષ્મણ ।
દેહાભિમાનિનઃ સર્વે દોષાઃ પ્રાદુર્ભવન્તિ હિ ॥ ૩૨॥

દેહોઽહમિતિ યા બુદ્ધિરવિદ્યા સા પ્રકીર્તિતા ।
નાહં દેહશ્ચિદાત્મેતિ બુદ્ધિર્વિદ્યેતિ ભણ્યતે ॥ ૩૩॥

અવિદ્યા સંસૃતેર્હેતુર્વિદ્યા તસ્યા નિવર્તિકા ।
તસ્માદ્યત્નઃ સદા કાર્યો વિદ્યાભ્યાસે મુમુક્ષુભિઃ ।
કામક્રોધાદયસ્તત્ર શત્રવઃ શત્રુસૂદન ॥ ૩૪॥

તત્રાપિ ક્રોધ એવાલં મોક્ષવિઘ્નાય સર્વદા ।
યેનાવિષ્ટઃ પુમાન્ હન્તિ પિતૃભ્રાતૃસુહૃત્સખીન્ ॥ ૩૫॥

ક્રોધમૂલો મનસ્તાપઃ ક્રોધઃ સંસારબન્ધનમ્ ।
ધર્મક્ષયકરઃ ક્રોધસ્તસ્માત્ક્રોધં પરિત્યજ ॥ ૩૬॥

ક્રોધ એષ મહાન્ શત્રુસ્તૃષ્ણા વૈતરણી નદી ।
સન્તોષો નન્દનવનં શાન્તિરેવ હિ કામધુક્ ॥ ૩૭॥

તસ્માચ્છાન્તિં ભજસ્વાદ્ય શત્રુરેવં ભવેન્ન તે ।
દેહેન્દ્રિયમનઃપ્રાણબુદ્ધ્યાદિભ્યો વિલક્ષણઃ ॥ ૩૮॥

આત્મા શુદ્ધઃ સ્વયઞ્જ્યોતિરવિકારી નિરાકૃતિઃ ।
યાવદ્દેહેન્દ્રિયપ્રાણૈર્ભિન્નત્વં નાત્મનો વિદુઃ ॥ ૩૯॥

તાવત્સંસારદુઃખૌઘૈઃ પીડ્યન્તે મૃત્યુસંયુતાઃ ।
તસ્માત્ત્વં સર્વદા ભિન્નમાત્માનં હૃદિ ભાવય ॥ ૪૦॥

બુદ્ધ્યાદિભ્યો બહિઃ સર્વમનુવર્તસ્વ મા ખિદઃ ।
ભુઞ્જન્ પ્રારબ્ધમખિલં સુખં વા દુઃખમેવ વા ॥ ૪૧॥

પ્રવાહપતિતં કાર્યં કુર્વન્નપિ ન લિપ્યસે ।
બાહ્યે સર્વત્ર કર્તૃત્વમાવહન્નપિ રાઘવ ॥ ૪૨॥

અન્તઃશુદ્ધસ્વભાવસ્ત્વં લિપ્યસે ન ચ કર્મભિઃ ।
એતન્મયોદિતં કૃત્સ્નં હૃદિ ભાવય સર્વદા ॥ ૪૩॥

સંસારદુઃખૈરખિલૈર્બાધ્યસે ન કદાચન ।
ત્વમપ્યમ્બ મમાઽઽદિષ્ટં હૃદિ ભાવય નિત્યદા ॥ ૪૪॥

સમાગમં પ્રતીક્ષસ્વ ન દુઃખૈઃ પીડ્યસે ચિરમ્ ।
ન સદૈકત્ર સંવાસઃ કર્મમાર્ગાનુવર્તિનામ્ ॥ ૪૫॥

યથા પ્રવાહપતિતપ્લવાનાં સરિતાં તથા ।
ચતુર્દશસમા સઙ્ખ્યા ક્ષણાર્દ્ધમિવ જાયતે ॥ ૪૬॥

અનુમન્યસ્વ મામમ્બ દુઃખં સન્ત્યજ્ય દૂરતઃ ।
એવં ચેત્સુખસંવાસો ભવિષ્યતિ વને મમ ॥ ૪૭॥

ઇત્યુક્ત્વા દણ્ડવન્માતુઃ પાદયોરપતચ્ચિરમ્ ।
ઉત્થાપ્યાઙ્કે સમાવેશ્ય આશીર્ભિરભ્યનન્દયત્ ॥ ૪૮॥

સર્વે દેવાઃ સગન્ધર્વા બ્રહ્મવિષ્ણુશિવાદયઃ ।
રક્ષન્તુ ત્વાં સદા યાન્તં તિષ્ઠન્તં નિદ્રયા યુતમ્ ॥ ૪૯॥

ઇતિ પ્રસ્થાપયામાસ સમાલિઙ્ગ્ય પુનઃ પુનઃ ।
લક્ષ્મણોઽપિ તદા રામં નત્વા હર્ષાશ્રુગદ્ગદઃ ॥ ૫૦॥

આહ રામ મમાન્તઃસ્થઃ સંશયોઽયં ત્વયા હૃતઃ ।
યાસ્યામિ પૃષ્ઠતો રામ સેવાં કર્તું તદાદિશ ॥ ૫૧॥

અનુગૃહ્ણીષ્વ માં રામ નોચેત્પ્રાણાન્સ્ત્યજામ્યહમ્ ।

તથેતિ રાઘવોઽપ્યાહ લક્ષ્મણં યાહિ મા ચિરમ્ ॥ ૫૨॥

પ્રતસ્થે તાં સમાધાતું ગતઃ સીતાપતિર્વિભુઃ ।
આગતં પતિમાલોક્ય સીતા સુસ્મિતભાષિણી ॥ ૫૩॥

સ્વર્ણપાત્રસ્થસલિલૈઃ પાદૌ પ્રક્ષાલ્ય ભક્તિતઃ ।
પપ્રચ્છ પતિમાલોક્ય દેવ કિં સેનયા વિના ॥ ૫૪॥

આગતોઽસિ ગતઃ કુત્ર શ્વેતચ્છત્રં ચ તે કુતઃ ।
વાદિત્રાણિ ન વાદ્યન્તે કિરીટાદિવિવર્જિતઃ ॥ ૫૫॥

સામન્તરાજસહિતઃ સમ્ભ્રમાન્નાગતોઽસિ કિમ્ ।
ઇતિ સ્મ સીતયા પૃષ્ટો રામઃ સસ્મિતમબ્રવીત્ ॥ ૫૬॥

રાજ્ઞા મે દણ્ડકારણ્યે રાજ્યં દત્તં શુભેઽખિલમ્ ।
અતસ્તત્પાલનાર્થાય શીઘ્રં યાસ્યામિ ભામિનિ ॥ ૫૭॥

અદ્યૈવ યાસ્યામિ વનં ત્વં તુ શ્વશ્રૂસમીપગા ।
શુશ્રૂષાં કુરુ મે માતુર્ન મિથ્યાવાદિનો વયમ્ ॥ ૫૮॥

ઇતિ બ્રુવન્તં શ્રીરામં સીતા ભીતાબ્રવીદ્વચઃ ।
કિમર્થં વનરાજ્યં તે પિત્રા દત્તં મહાત્મના ॥ ૫૯॥

તામાહ રામઃ કૈકેય્યૈ રાજા પ્રીતો વરં દદૌ ।
ભરતાય દદૌ રાજ્યં વનવાસં મમાનઘે ॥ ૬૦॥

ચતુર્દશ સમાસ્તત્ર વાસો મે કિલ યાચિતઃ ।
તયા દેવ્યા દદૌ રાજા સત્યવાદી દયાપરઃ ॥ ૬૧॥

અતઃ શીઘ્રં ગમિષ્યામિ મા વિઘ્નં કુરુ ભામિનિ ।
શ્રુત્વા તદ્રામવચનં જાનકી પ્રીતિસંયુતા ॥ ૬૨॥

અહમગ્રે ગમિષ્યામિ વનં પશ્ચાત્ત્વમેષ્યસિ ।
ઇત્યાહ માં વિના ગન્તું તવ રાઘવ નોચિતમ્ ॥ ૬૩॥

તામાહ રાઘવઃ પ્રીતઃ સ્વપ્રિયાં પ્રિયવાદિનીમ્ ।
કથં વનં ત્વાં નેષ્યેઽહં બહુવ્યાઘ્રમૃગાકુલમ્ ॥ ૬૪॥

રાક્ષસા ઘોરરૂપાશ્ચ સન્તિ માનુષભોજિનઃ ।
સિંહવ્યાઘ્રવરાહાશ્ચ સઞ્ચરન્તિ સમન્તતઃ ॥ ૬૫॥

કટ્વમ્લફલમૂલાનિ ભોજનાર્થં સુમધ્યમે ।
અપૂપાન્નવ્યઞ્જનાનિ વિદ્યન્તે ન કદાચન ॥ ૬૬॥

કાલે કાલે ફલં વાપિ વિદ્યતે કુત્ર સુન્દરિ ।
માર્ગો ન દૃશ્યતે ક્વાપિ શર્કરાકણ્ટકાન્વિતઃ ॥ ૬૭॥

ગુહાગહ્વરસમ્બાધં ઝિલ્લીદંશાદિભિર્યુતમ્ ।
એવં બહુવિધં દોષં વનં દણ્ડકસઞ્જ્ઞિતમ્ ॥ ૬૮॥

પાદચારેણ ગન્તવ્યં શીતવાતાતપાદિમત્ ।
રાક્ષસાદીન્ વને દૃષ્ટ્વા જીવિતં હાસ્યસેઽચિરાત્ ॥ ૬૯॥

તસ્માદ્ભદ્રે ગૃહે તિષ્ઠ શીઘ્રં દ્રક્ષ્યસિ માં પુનઃ ।
રામસ્ય વચનં શ્રુત્વા સીતા દુઃખસમન્વિતા ॥ ૭૦॥

પ્રત્યુવાચ સ્ફુરદ્વક્ત્રા કિઞ્ચિત્કોપસમન્વિતા ।
કથં મામિચ્છસે ત્યક્તું ધર્મપત્નીં પતિવ્રતામ્ ॥ ૭૧॥

ત્વદનન્યામદોષાં માં ધર્મજ્ઞોઽસિ દયાપરઃ ।
ત્વત્સમીપે સ્થિતાં રામ કો વા માં ધર્ષયેદ્વને ॥ ૭૨॥

ફલમૂલાદિકં યદ્યત્તવ ભુક્તાવશેષિતમ્ ।
તદેવામૃતતુલ્યં મે તેન તુષ્ટા રમામ્યહમ્ ॥ ૭૩॥

ત્વયા સહ ચરન્ત્યા મે કુશાઃ કાશાશ્ચ કણ્ટકાઃ ।
પુષ્પાસ્તરણતુલ્યા મે ભવિષ્યન્તિ ન સંશયઃ ॥ ૭૪॥

અહં ત્વાં ક્લેશયે નૈવ ભવેયં કાર્યસાધિની ।
બાલ્યે માં વીક્ષ્ય કશ્ચિન્માં જ્યોતિઃશાસ્ત્રવિશારદઃ ॥ ૭૫॥

પ્રાહ તે વિપિને વાસઃ પત્યા સહ ભવિષ્યતિ ।
સત્યવાદી દ્વિજો ભૂયાદ્ગમિષ્યામિ ત્વયા સહ ॥ ૭૬॥

અન્યત્કિઞ્ચિત્પ્રવક્ષ્યામિ શ્રુત્વા માં નય કાનનમ્ ।
રામાયણાનિ બહુશઃ શ્રુતાનિ બહુભિર્દ્વિજૈઃ ॥ ૭૭॥

સીતાં વિના વનં રામો ગતઃ કિં કુત્રચિદ્વદ ।
અતસ્ત્વયા ગમિષ્યામિ સર્વથા ત્વત્સહાયિની ॥ ૭૮॥

યદિ ગચ્છસિ માં ત્યક્ત્વા પ્રાણાન્સ્ત્યક્ષ્યામિ તેઽગ્રતઃ ।
ઇતિ તં નિશ્ચયં જ્ઞાત્વા સીતાયા રઘુનન્દનઃ ॥ ૭૯॥

અબ્રવીદ્દેવિ ગચ્છ ત્વં વનં શીઘ્રં મયા સહ ।
અરુન્ધત્યૈ પ્રયચ્છાશુ હારાનાભરણાનિ ચ ॥ ૮૦॥

બ્રાહ્મણેભ્યો ધનં સર્વં દત્ત્વા ગચ્છામહે વનમ્ ।
ઇત્યુક્ત્વા લક્ષ્મણેનાશુ દ્વિજાનાહૂય ભક્તિતઃ ॥ ૮૧॥

દદૌ ગવાં વૃન્દશતં ધનાનિ
વસ્ત્રાણિ દિવ્યાનિ વિભૂષણાનિ ।
કુટુમ્બવદ્ભ્યઃ શ્રુતશીલવદ્ભ્યો
મુદા દ્વિજેભ્યો રઘુવંશકેતુઃ ॥ ૮૨॥

અરુન્ધત્યૈ દદૌ સીતા મુખ્યાન્યાભરણાનિ ચ ।
રામો માતુઃ સેવકેભ્યો દદૌ ધનમનેકધા ॥ ૮૩॥

સ્વકાન્તઃપુરવાસિભ્યઃ સેવકેભ્યસ્તથૈવ ચ ।
પૌરજાનપદેભ્યશ્ચ બ્રાહ્મણેભ્યઃ સહસ્રશઃ ॥ ૮૪॥

લક્ષ્મણોઽપિ સુમિત્રાં તુ કૌસલ્યાયૈ સમર્પયત્ ।
ધનુષ્પાણિઃ સમાગત્ય રામસ્યાગ્રે વ્યવસ્થિતઃ ॥ ૮૫॥

રામઃ સીતા લક્ષ્મણશ્ચ જગ્મુઃ સર્વે નૃપાલયમ્ ॥ ૮૬॥

શ્રીરામઃ સહ સીતયા નૃપપથે ગચ્છન્ શનૈઃ સાનુજઃ ।
પૌરાન્ જાનપદાન્ કુતૂહલદૃશઃ સાનન્દમુદ્વીક્ષયન્ ।
શ્યામઃ કામસહસ્રસુન્દરવપુઃ કાન્ત્યા દિશો ભાસયન્ ।
પાદન્યાસપવિત્રિતાઽખિલજગત્ પ્રાપાલયં તત્પિતુઃ ॥ ૮૭॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અયોધ્યાકાણ્ડે ચતુર્થઃ સર્ગઃ ॥ ૪॥

## ॥ પઞ્ચમઃ સર્ગઃ ॥

આયાન્તં નાગરા દૃષ્ટ્વા માર્ગે રામં સજાનકીમ્ ।
લક્ષ્મણેન સમં વીક્ષ્ય ઊચુઃ સર્વે પરસ્પરમ્ ॥ ૧॥

કૈકેય્યા વરદાનાદિ શ્રુત્વા દુઃખસમાવૃતાઃ ।

બત રાજા દશરથઃ સત્યસન્ધં પ્રિયં સુતમ્ ॥ ૨॥

સ્ત્રીહેતોરત્યજત્કામી તસ્ય સત્યવતા કુતઃ ।
કૈકેયી વા કથં દુષ્ટા રામં સત્યં પ્રિયઙ્કરમ્ ॥ ૩॥

વિવાસયામાસ કથં ક્રૂરકર્માऽતિમૂઢધીઃ ।
હે જના નાત્ર વસ્તવ્યં ગચ્છામોऽદ્યૈવ કાનનમ્ ॥ ૪॥

યત્ર રામઃ સભાર્યશ્ચ સાનુજો ગન્તુમિચ્છતિ ।
પશ્યન્તુ જાનકીં સર્વે પાદચારેણ ગચ્છતીમ્ ॥ ૫॥

પુમ્ભિઃ કદાચિદ્દૃષ્ટ્વા વા જાનકી લોકસુન્દરી ।
સાપિ પાદેન ગચ્છન્તી જનસઙ્ઘેષ્વનાવૃતા ॥ ૬॥

રામોऽપિ પાદચારેણ ગજાશ્વાદિવિવર્જિતઃ ।
ગચ્છતિ દ્રક્ષ્યથ વિભું સર્વલોકૈકસુન્દરમ્ ॥ ૭॥

રાક્ષસી કૈકેયીનામ્ની જાતા સર્વવિનાશિની ।
રામસ્યાપિ ભવેદ્દુઃખં સીતાયાઃ પાદયાનતઃ ॥ ૮॥

બલવાન્ વિધિરેવાત્ર પુમ્પ્રયત્નો હિ દુર્બલઃ ।
ઇતિ દુઃખાકુલે વૃન્દે સાધૂનાં મુનિપુઙ્ગવઃ ॥ ૯॥

અબ્રવીદ્વામદેવોऽથ સાધૂનાં સઙ્ઘમધ્યગઃ ।
માનુશોચથ રામં વા સીતાં વા વચ્મિ તત્ત્વતઃ ॥ ૧૦॥

એષ રમઃ પરો વિષ્ણુરાદિનારાયણઃ સ્મૃતઃ ।
એષા સા જાનકી લક્ષ્મીર્યોગમાયેતિ વિશ્રુતા ॥ ૧૧॥

અસૌ શેષસ્તમન્વેતિ લક્ષ્મણાખ્યશ્ચ સામ્પ્રતમ્ ।
એષ માયાગુણૈર્યુક્તસ્તત્તદાકારવાનિવ ॥ ૧૨॥

એષ એવ રજોયુક્તો બ્રહ્માભૂદ્વિશ્વભાવનઃ ।
સત્ત્વાવિષ્ટસ્તથા વિષ્ણુસ્ત્રિજગત્પ્રતિપાલકઃ ॥ ૧૩॥

એષ રુદ્રસ્તામસોऽન્તે જગત્પ્રલયકારણમ્ ।
એષ મત્સ્યઃ પુરા ભૂત્વા ભક્તં વૈવસ્વતં મનુમ્ ॥ ૧૪॥

નાવ્યારોપ્ય લયસ્યાન્તે પાલયામાસ રાઘવઃ ।
સમુદ્રમથને પૂર્વં મન્દરે સુતલં ગતે ॥ ૧૫॥

અધારયત્સ્વપૃષ્ઠેઽદ્રિં કૂર્મરૂપી રઘૂત્તમઃ ।
મહી રસાતલં યાતા પ્રલયે સૂકરોઽભવત્ ॥ ૧૬॥

તોલયામાસ દંષ્ટ્રાગ્રે તાં ક્ષોણીં રઘુનન્દનઃ ।
નારસિંહં વપુઃ કૃત્વા પ્રહ્લાદવરદઃ પુરા ॥ ૧૭॥

ત્રૈલોક્યકણ્ટકં રક્ષઃ પાટયામાસ તન્નખૈઃ ।
પુત્રરાજ્યં હૃતં દૃષ્ટ્વા હ્યદિત્યા યાચિતઃ પુરા ॥ ૧૮॥

વામનત્વમુપાગમ્ય યાચ્ઞયા ચાહરત્પુનઃ ।
દુષ્ટક્ષત્રિયભૂભારનિવૃત્ત્યૈ ભાર્ગવોઽભવત્ ॥ ૧૯॥

સ એવ જગતાં નાથ ઇદાનીં રામતાં ગતઃ ।
રાવણાદીનિ રક્ષાંસિ કોટિશો નિહનિષ્યતિ ॥ ૨૦॥

માનુષેણૈવ મરણં તસ્ય દૃષ્ટં દુરાત્મનઃ ।
રાજ્ઞા દશરથેનાપિ તપસારાધિતો હરિઃ ॥ ૨૧॥

પુત્રત્વાકાઙ્ક્ષયા વિષ્ણોસ્તદા પુત્રોઽભવદ્ધરિઃ ।
સ એવ વિષ્ણુઃ શ્રીરામો રાવણાદિવધાય હિ ॥ ૨૨॥

ગન્તાથૈવ વનં રામો લક્ષ્મણેન સહાયવાન્ ।
એષા સીતા હરેર્માયા સૃષ્ટિસ્થિત્યન્તકારિણી ॥ ૨૩॥

રાજા વા કૈકેયી વાપિ નાત્ર કારણમણ્વપિ ।
પૂર્વેદ્યુર્નારદઃ પ્રાહ ભૂભારહરણાય ચ ॥ ૨૪॥

રામોઽપ્યાહ સ્વયં સાક્ષાચ્છ્વો ગમિષ્યામ્યહં વનમ્ ।
અતો રામં સમુદ્દિશ્ય ચિન્તાં ત્યજત બાલિશાઃ ॥ ૨૫॥

રામરામેતિ યે નિત્યં જપન્તિ મનુજા ભુવિ ।
તેષાં મૃત્યુભયાદીનિ ન ભવન્તિ કદાચન ॥ ૨૬॥

કા પુનસ્તસ્ય રામસ્ય દુઃખશઙ્કા મહાત્મનઃ ।
રામનામ્નૈવ મુક્તિઃ સ્યાત્કલૌ નાન્યેન કેનચિત્ ॥ ૨૭॥

માયામાનુષરૂપેણ વિડમ્બયતિ લોકકૃત્ ।
ભક્તાનાં ભજનાર્થાય રાવણસ્ય વધાય ચ ॥ ૨૮॥

રાજ્ઞશ્ચાભીષ્ટસિદ્ધ્યર્થં માનુષં વપુરાશ્રિતઃ ।
ઇત્યુક્ત્વા વિરરામાથ વામદેવો માહામુનિઃ ॥ ૨૯॥

શ્રુત્વા તેઽપિ દ્વિજાઃ સર્વે રામં જ્ઞાત્વા હરિં વિભુમ્ ।
જહુર્હૃત્સંશયગ્રન્થિં રામમેવાન્વચિન્તયન્ ॥ ૩૦॥

ય ઇદં ચિન્તયેન્નિત્યં રહસ્યં રામસીતયોઃ ।
તસ્ય રામે દૃઢા ભક્તિર્ભવેદ્વિજ્ઞાનપૂર્વિકા ॥ ૩૧॥

રહસ્યં ગોપનીયં વો યૂયં વૈ રાઘવપ્રિયાઃ ।
ઇત્યુક્ત્વા પ્રયયૌ વિપ્રસ્તેઽપિ રામં પરં વિદુઃ ॥ ૩૨॥

તતો રામઃ સમાવિશ્ય પિતૃગેહમવારિતઃ ।
સાનુજઃ સીતયા ગત્વા કૈકેયીમિદમબ્રવીત્ ॥ ૩૩॥

આગતાઃ સ્મો વયં માતસ્ત્રયસ્તે સમ્મતં વનમ્ ।
ગન્તું કૃતધિયઃ શીઘ્રમાજ્ઞાપયતુ નઃ પિતા ॥ ૩૪॥

ઇત્યુક્તા સહસોત્થાય ચીરાણિ પ્રદદૌ સ્વયમ્ ।
રામાય લક્ષ્મણાયાથ સીતાયૈ ચ પૃથક્ પૃથક્ ॥ ૩૫॥

રામસ્તુ વસ્ત્રાણ્યુત્સૃજ્ય વન્યચીરાણિ પર્યધાત્ ।
લક્ષ્મણોઽપિ તથા ચક્રે સીતા તન્ન વિજાનતી ॥ ૩૬॥

હસ્તે ગૃહીત્વા રામસ્ય લજ્જયા મુખમૈક્ષત ।
રામો ગૃહીત્વા તચ્ચીરમંશુકે પર્યવેષ્ટયત્ ॥ ૩૭॥

તદ્ દૃષ્ટ્વા રુરુદુઃ સર્વે રાજદારાઃ સમન્તતઃ ।
વસિષ્ઠસ્તુ તદાકર્ણ્ય રુદિતં ભર્ત્સયન્ રુષા ॥ ૩૮॥

કૈકેયીં પ્રાહ દુર્વૃત્તે રામ એવ ત્વયા વૃતઃ ।
વનવાસાય દુષ્ટે ત્વં સીતાયૈ કિં પ્રયચ્છસિ ॥ ૩૯॥

યદિ રામં સમન્વેતિ સીતા ભક્ત્યા પતિવ્રતા ।
દિવ્યામ્બરધરા નિત્યં સર્વાભરણભૂષિતા ॥ ૪૦॥

રમયત્વનિશં રામં વનદુઃખનિવારિણી ।
રાજા દશરથોઽપ્યાહ સુમન્ત્રં રથમાનય ॥ ૪૧॥

રથમારુહ્ય ગચ્છન્તુ વનં વનચરપ્રિયાઃ ।
ઇત્યુક્ત્વા રામમાલોક્ય સીતાં ચૈવ સલક્ષ્મણમ્ ॥ ૪૨॥

દુઃખાન્નિપતિતો ભૂમૌ રુરોદાશ્રુપરિપ્લુતઃ ।

આરુરોહ રથં સીતા શીઘ્રં રામસ્ય પશ્યતઃ ॥ ૪૩॥

રામઃ પ્રદક્ષિણં કૃત્વા પિતરં રથમારુહત્ ।
લક્ષ્મણઃ ખડ્ગયુગલં ધનુસ્તૂણીયુગં તથા ॥ ૪૪॥

ગૃહીત્વા રથમારુહ્ય નોદયામાસ સારથિમ્ ।
તિષ્ઠ તિષ્ઠ સુમન્ત્રેતિ રાજા દશરથોઽબ્રવીત્ ॥ ૪૫॥

ગચ્છ ગચ્છેતિ રામેણ નોદિતોઽચોદયદ્રથમ્ ।
રામે દૂરં ગતે રાજા મૂર્ચ્છિતઃ પ્રાપતદ્ભુવિ ॥ ૪૬॥

પૌરાસ્તુ બાલવૃદ્ધાશ્ચ વૃદ્ધા બ્રાહ્મણસત્તમાઃ ।
તિષ્ઠ તિષ્ઠેતિ રામેતિ ક્રોશન્તો રથમન્વયુઃ ॥ ૪૭॥

રાજા રુદિત્વા સુચિરં માં નયન્તુ ગૃહં પ્રતિ ।
કૌસલ્યાયા રામમાતુરિત્યાહ પરિચારકાન્ ॥ ૪૮॥

કિઞ્ચિત્કાલં ભવેત્તત્ર જીવનં દુઃખિતસ્ય મે ।
અત ઊર્ધ્વં ન જીવામિ ચિરં રામં વિના કૃતઃ ॥ ૪૯॥

તતો ગૃહં પ્રવિશ્યૈવ કૌસલ્યાયાઃ પપાત હ ।
મૂર્ચ્છિતશ્ચ ચિરાદ્બુદ્ધ્વા તૂષ્ણીમેવાવતસ્થિવાન્ ॥ ૫૦॥

રામસ્તુ તમસાતીરં ગત્વા તત્રાવસત્સુખી ।
જલં પ્રાશ્ય નિરાહારો વૃક્ષમૂલેઽસ્વપદ્વિભુઃ ॥ ૫૧॥

સીતયા સહ ધર્માત્મા ધનુષ્પાણિસ્તુ લક્ષ્મણઃ ।
પાલયામાસ ધર્મજ્ઞઃ સુમન્ત્રેણ સમન્વિતઃ ॥ ૫૨॥

પૌરાઃ સર્વે સમાગત્ય સ્થિતાસ્તસ્યાવિદૂરતઃ ।
શક્તા રામં પુરં નેતું નો ચેદ્ગચ્છામહે વનમ્ ॥ ૫૩॥

ઇતિ નિશ્ચયમાજ્ઞાય તેષાં રામોઽતિવિસ્મિતઃ ।
નાહં ગચ્છામિ નગરમેતે વૈ ક્લેશભાગિનઃ ॥ ૫૪॥

ભવિષ્યન્તીતિ નિશ્ચિત્ય સુમન્ત્રમિદમબ્રવીત્ ।
ઇદાનીમેવ ગચ્છામઃ સુમન્ત્ર રથમાનય ॥ ૫૫॥

ઇત્યાજ્ઞપ્તઃ સુમન્ત્રોઽપિ રથં વાહૈરયોજયત્ ।
આરુહ્ય રામઃ સીતા ચ લક્ષ્મણોઽપિ યયુર્દ્રુતમ્ ॥ ૫૬॥

અયોધ્યાભિમુખં ગત્વા કિઞ્ચિદ્દૂરં તતો યયુઃ ।
તેઽપિ રામમદૃષ્ટ્વૈવ પ્રાતરુત્થાય દુઃખિતાઃ ॥ ૫૭॥

રથનેમિગતં માર્ગં પશ્યન્તસ્તે પુરં યયુઃ ।
હૃદિ રામં સસીતં તે ધ્યાયન્તસ્તસ્થુરન્વહમ્ ॥ ૫૮॥

સુમન્ત્રોઽપિ રથં શીઘ્રં નોદયામાસ સાદરમ્ ।
સ્ફીતાન્ જનપદાન્ પશ્યન્ રામઃ સીતાસમન્વિતઃ ॥ ૫૯॥

ગઙ્ગાતીરં સમાગચ્છચ્છૃઙ્ગવેરાવિદૂરતઃ ।
ગઙ્ગાં દૃષ્ટ્વા નમસ્કૃત્ય સ્નાત્વા સાનન્દમાનસઃ ॥ ૬૦॥

શિંશપાવૃક્ષમૂલે સ નિષસાદ રઘૂત્તમઃ ।
તતો ગુહો જનૈઃ શ્રુત્વા રામાગમમહોત્સવમ્ ॥ ૬૧॥

સખાયં સ્વામિનં દ્રષ્ટું હર્ષાત્તૂર્ણં સમાપતત્ ।
ફલાનિ મધુપુષ્પાદિ ગૃહીત્વા ભક્તિસંયુતઃ ॥ ૬૨॥

રામસ્યાગ્રે વિનિક્ષિપ્ય દણ્ડવત્પ્રાપતદ્ભુવિ ।
ગુહમુત્થાપ્ય તં તૂર્ણં રાઘવઃ પરિષસ્વજે ॥ ૬૩॥

સમ્પૃષ્ટકુશલો રામં ગુહઃ પ્રાઞ્જલિરબ્રવીત્ ।
ધન્યોઽહમદ્ય મે જન્મ નૈષાદં લોકપાવન ॥ ૬૪॥

બભૂવ પરમાનન્દઃ સ્પૃષ્ટ્વા તેઽઙ્ગં રઘૂત્તમ ।
નૈષાદરાજ્યમેતત્તે કિઙ્કરસ્ય રઘૂત્તમ ॥ ૬૫॥

ત્વદધીનં વસન્નત્ર પાલયાસ્માન્ રઘૂદ્વહ ।
આગચ્છ યામો નગરં પાવનં કુરુ મે ગૃહમ્ ॥ ૬૬॥

ગૃહાણ ફલમૂલાનિ ત્વદર્થં સઞ્ચિતાનિ મે ।
અનુગૃહ્ણીષ્વ ભગવન્ દાસસ્તેઽહં સુરોત્તમ ॥ ૬૭॥

રામસ્તમાહ સુપ્રીતો વચનં શૃણુ મે સખે ।
ન વેક્ષ્યામિ ગૃહં ગ્રામં નવ વર્ષાણિ પઞ્ચ ચ ॥ ૬૮॥

દત્તમન્યેન નો ભુઞ્જે ફલમૂલાદિ કિઞ્ચન ।
રાજ્યં મમૈતત્તે સર્વં ત્વં સખા મેઽતિવલ્લભઃ ॥ ૬૯॥

વટક્ષીરં સમાનાય્ય જટામુકુટમાદરાત્ ।
બબન્ધ લક્ષ્મણેનાથ સહિતો રઘુનન્દનઃ ॥ ૭૦॥

જલમાત્રં તુ સમ્પ્રાશ્ય સીતયા સહ રાઘવઃ ।
આસ્તૃતં કુશપર્ણાદ્યૈઃ શયનં લક્ષ્મણેન હિ ॥ ૭૧॥

ઉવાસ તત્ર નગરપ્રાસાદાગ્રે યથા પુરા ।
સુષ્વાપ તત્ર વૈદેહ્યા પર્યઙ્કે ઇવ સંસ્કૃતે ॥ ૭૨॥

તતોઽવિદૂરે પરિગૃહ્ય ચાપં
સબાણતૂણીરધનુઃ સ લક્ષ્મણઃ ।
રરક્ષ રામં પરિતો વિપશ્યન્
ગુહેન સાર્ધં સશરાસનેન ॥ ૭૩॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અયોધ્યાકાણ્ડે પઞ્ચમઃ સર્ગઃ ॥ ૫॥

## ॥ ષષ્ઠઃ સર્ગઃ ॥

સુપ્તં રામં સમાલોક્ય ગુહઃ સોઽશ્રુપરિપ્લુતઃ ।
લક્ષ્મણં પ્રાહ વિનયાદ્ ભ્રાતઃ પશ્યસિ રાઘવમ્ ॥ ૧॥

શયાનં કુશપત્રૌઘસંસ્તરે સીતયા સહ ।
યઃ શેતે સ્વર્ણપર્યઙ્કે સ્વાસ્તીર્ણે ભવનોત્તમે ॥ ૨॥

કૈકેયી રામદુઃખસ્ય કારણં વિધિના કૃતા ।
મન્થરાબુદ્ધિમાસ્થાય કૈકેયી પાપમાચરત્ ॥ ૩॥

તચ્છ્રુત્વા લક્ષ્મણઃ પ્રાહ સખે શૃણુ વચો મમ ।
કઃ કસ્ય હેતુર્દુઃખસ્ય કશ્ચ હેતુઃ સુખસ્ય ચ ॥ ૪॥

સ્વપૂર્વાર્જિતકર્મૈવ કારણં સુખદુઃખયોઃ ॥ ૫॥

સુખસ્ય દુઃખસ્ય ન કોઽપિ દાતા
પરો દદાતીતિ કુબુદ્ધિરેષા ।
અહં કરોમીતિ વૃથાભિમાનઃ
સ્વકર્મસૂત્રગ્રથિતો હિ લોકઃ ॥ ૬॥

સુહૃન્મિત્રાર્યુદાસીનદ્વેષ્યમધ્યસ્થબાન્ધવાઃ ।

સ્વયમેવાચરન્ કર્મ તથા તત્ર વિભાવ્યતે ॥ ૭॥

સુખં વા યદિ વા દુઃખં સ્વકર્મવશગો નરઃ ।
યદ્યદ્યથાગતં તત્તદ્ ભુક્ત્વા સ્વસ્થમના ભવેત્ ॥ ૮॥

ન મે ભોગાગમે વાઞ્છા ન મે ભોગવિવર્જને ।
આગચ્છત્વથ માગચ્છત્વભોગવશગો ભવેત્ ॥ ૯॥

સ્વસ્મિન્ દેશે ચ કાલે ચ યસ્માદ્વા યેન કેન વા ।
કૃતં શુભાશુભં કર્મ ભોજ્યં તત્તત્ર નાન્યથા ॥ ૧૦॥

અલં હર્ષવિષાદાભ્યાં શુભાશુભફલોદયે ।
વિધાત્રા વિહિતં યદ્યત્તદલઙ્ઘ્યં સુરાસુરૈઃ ॥ ૧૧॥

સર્વદા સુખદુઃખાભ્યાં નરઃ પ્રત્યવરુધ્યતે ।
શરીરં પુણ્યપાપાભ્યામુત્પન્નં સુખદુઃખવત્ ॥ ૧૨॥

સુખસ્યાનન્તરં દુઃખં દુઃખસ્યાનન્તરં સુખમ્ ।
દ્વયમેતદ્ધિ જન્તૂનામલઙ્ઘ્યં દિનરાત્રિવત્ ॥ ૧૩॥

સુખમધ્યે સ્થિતં દુઃખં દુઃખમધ્યે સ્થિતં સુખમ્ ।
દ્વયમન્યોન્યસંયુક્તં પ્રોચ્યતે જલપઙ્કવત્ ॥ ૧૪॥

તસ્માદ્ધૈર્યેણ વિદ્વાંસ ઇષ્ટાનિષ્ટોપપત્તિષુ ।
ન હૃષ્યન્તિ ન મુહ્યન્તિ સમં માયેતિ ભાવનાત્ ॥ ૧૫॥

ગુહલક્ષ્મણયોરેવં ભાષતોર્વિમલં નભઃ ।
બભૂવ રામઃ સલિલં સ્પૃષ્ટ્વા પ્રાતઃ સમાહિતઃ ॥ ૧૬॥

ઉવાચ શીઘ્રં સુદૃઢં નાવમાનય મે સખે ।
શ્રુત્વા રામસ્ય વચનં નિષાદાધિપતિર્ગુહઃ ॥ ૧૭॥

સ્વયમેવ દૃઢં નાવમાનિનાય સુલક્ષણામ્ ।
સ્વામિન્નારુહ્યતાં નૌકાં સીતયા લક્ષ્મણેન ચ ॥ ૧૮॥

વાહયે જ્ઞાતિભિઃ સાર્ધમહમેવ સમાહિતઃ ।
તથેતિ રાઘવઃ સીતામારોપ્ય શુભલક્ષણામ્ ॥ ૧૯॥

ગુહસ્ય હસ્તાવાલમ્બ્ય સ્વયં ચારોહદચ્યુતઃ ।
આયુધાદીન્ સમારોપ્ય લક્ષ્મણોઽપ્યારુરોહ ચ ॥ ૨૦॥

ગુહસ્તાન્ વાહયામાસ જ્ઞાતિભિઃ સહિતઃ સ્વયમ્ ।
ગઙ્ગામધ્યે ગતાં ગઙ્ગાં પ્રાર્થયામાસ જાનકી ॥ ૨૧॥

દેવિ ગઙ્ગે નમસ્તુભ્યં નિવૃત્તા વનવાસતઃ ।
રામેણ સહિતાહં ત્વાં લક્ષ્મણેન ચ પૂજયે ॥ ૨૨॥

સુરામાન્સોપહારૈશ્ચ નાનાબલિભિરાદૃતા ।
ઇત્યુક્ત્વા પરકૂલં તૌ શનૈરુત્તીર્ય જગ્મતુઃ ॥ ૨૩॥

ગુહોઽપિ રાઘવં પ્રાહ ગમિષ્યામિ ત્વયા સહ ।
અનુજ્ઞાં દેહિ રાજેન્દ્ર નો ચેત્પ્રાણાન્સ્ત્યજામ્યહમ્ ॥ ૨૪॥

શ્રુત્વા નૈષાદિવચનં શ્રીરામસ્તમથાબ્રવીત્ ।
ચતુર્દશ સમાઃ સ્થિત્વા દણ્ડકે પુનરપ્યહમ્ ॥ ૨૫॥

આયાસ્યામ્યુદિતં સત્યં નાસત્યં રામભાષિતમ્ ।
ઇત્યુક્ત્વાલિઙ્ગ્ય તં ભક્તં સમાશ્વાસ્ય પુનઃ પુનઃ ॥ ૨૬॥

નિવર્તયામાસ ગુહં સોઽપિ કૃચ્છ્રાદ્યયૌ ગૃહમ્ ॥ ૨૭॥

તત્ર મેધ્યં મૃગં હત્વા પક્ત્વા હુત્વા ચ તે ત્રયઃ ।
ભુક્ત્વા વૃક્ષતલે સુપ્ત્વા સુખમાસત તાં નિશામ્ ॥ ૨૮॥

તતો રામસ્તુ વૈદેહ્યા લક્ષ્મણેન સમન્વિતઃ ।
ભરદ્વાજાશ્રમપદં ગત્વા બહિરુપસ્થિતઃ ।
તત્રૈકં વટુકં દૃષ્ટ્વા રામઃ પ્રાહ ચ હે વટો ॥ ૨૯॥

રામો દાશરથિઃ સીતાલક્ષ્મણાભ્યાં સમન્વિતઃ ।
આસ્તે બહિર્વનસ્યેતિ હ્યુચ્યતાં મુનિસન્નિધૌ ॥ ૩૦॥

તચ્છ્રુત્વા સહસા ગત્વા પાદયોઃ પતિતો મુનેઃ ।
સ્વામિન્ રામઃ સમાગત્ય વનાદ્બહિરવસ્થિતઃ ॥ ૩૧॥

સભાર્યઃ સાનુજઃ શ્રીમાનાહ માં દેવસન્નિભઃ ।
ભરદ્વાજાય મુનયે જ્ઞાપયસ્વ યથોચિતમ્ ॥ ૩૨॥

તચ્છ્રુત્વા સહસોત્થાય ભરદ્વાજો મુનીશ્વરઃ ।
ગૃહીત્વાર્ઘ્યં ચ પાદ્યં ચ રામસામીપ્યમાયયૌ ॥ ૩૩॥

દૃષ્ટ્વા રામં યથાન્યાયં પૂજયિત્વા સલક્ષ્મણમ્ ।
આહ મે પર્ણશાલાં ભો રામ રાજીવલોચન ॥ ૩૪॥

આગચ્છ પાદરજસા પુનીહિ રઘુનન્દન ।
ઇત્યુક્ત્વોટજમાનીય સીતયા સહ રઘાવૌ ॥ ૩૫॥

ભક્ત્યા પુનઃ પૂજયિત્વા ચકારાતિથ્યમુત્તમમ્ ।
અદ્યાહં તપસઃ પારં ગતોઽસ્મિ તવ સઙ્ગમાત્ ॥ ૩૬॥

જ્ઞાતં રામ તવોદન્તં ભૂતં ચાગામિકં ચ યત્ ।
જાનામિ ત્વાં પરાત્માનં માયયા કાર્યમાનુષમ્ ॥ ૩૭॥

યદર્થમવતીર્ણોઽસિ પ્રાર્થિતો બ્રહ્મણા પુરા ।
યદર્થં વનવાસસ્તે યત્કરિષ્યસિ વૈ પુરઃ ॥ ૩૮॥

જાનામિ જ્ઞાનદૃષ્ટ્યાહં જાતયા ત્વદુપાસનાત્ ।
ઇતઃ પરં ત્વાં કિં વક્ષ્યે કૃતાર્થોઽહં રઘૂત્તમ ॥ ૩૯॥

યસ્ત્વાં પશ્યામિ કાકુત્સ્થં પુરુષં પ્રકૃતેઃ પરમ્ ।
રામસ્તમભિવાદ્યાહ સીતાલક્ષ્મણસંયુતઃ ॥ ૪૦॥

અનુગ્રાહ્યાસ્ત્વયા બ્રહ્મન્વયં ક્ષત્રિયબાન્ધવાઃ ।
ઇતિ સમ્ભાષ્ય તેઽન્યોન્યમુષિત્વા મુનિસન્નિધૌ ॥ ૪૧॥

પ્રાતરુત્થાય યમુનામુત્તીર્ય મુનિવારકૈઃ ।
કૃતાપ્લવેન મુનિના દૃષ્ટમાર્ગેણ રાઘવઃ ॥ ૪૨॥

પ્રયયૌ ચિત્રકૂટાદ્રિં વાલ્મીકેર્યત્ર ચાશ્રમઃ ।
ગત્વા રામોઽથ વાલ્મીકેરાશ્રમં ઋષિસઙ્કુલમ્ ॥ ૪૩॥

નાનામૃગદ્વિજાકીર્ણં નિત્યપુષ્પફલાકુલમ્ ।
તત્ર દૃષ્ટ્વા સમાસીનં વાલ્મીકિં મુનિસત્તમમ્ ॥ ૪૪॥

નનામ શિરસા રામો લક્ષ્મણેન ચ સીતયા ।
દૃષ્ટ્વા રામં રમાનાથં વાલ્મીકિર્લોકસુન્દરમ્ ॥ ૪૫॥

જાનકીલક્ષ્મણોપેતં જટામુકુટમણ્ડિતમ્ ।
કન્દર્પસદૃશાકારં કમનીયામ્બુજેક્ષણમ્ ॥ ૪૬॥

દૃષ્ટ્વૈવ સહસોત્તસ્થૌ વિસ્મયાનિમિષેક્ષણઃ ।
આલિઙ્ગ્ય પરમાનન્દં રામં હર્ષાશ્રુલોચનઃ ॥ ૪૭॥

પૂજયિત્વા જગત્પૂજ્યં ભક્ત્યાર્ઘ્યાદિભિરાદૃતઃ ।

ફલમૂલૈઃ સ મધુરૈર્ભોજયિત્વા ચ લાલિતઃ ॥ ૪૮॥

રાઘવઃ પ્રાઞ્જલિઃ પ્રાહ વાલ્મીકિં વિનયાન્વિતઃ ।
પિતુરાજ્ઞાં પુરસ્કૃત્ય દણ્ડકાનાગતા વયમ્ ॥ ૪૯॥

ભવન્તો યદિ જાનન્તિ કિં વક્ષ્યામોઽત્ર કારણમ્ ।
યત્ર મે સુખવાસાય ભવેત્સ્થાનં વદસ્વ તત્ ॥ ૫૦॥

સીતયા સહિતઃ કાલં કિઞ્ચિત્તત્ર નયામ્યહમ્ ।
ઇત્યુક્તો રાઘવેણાસૌ મુનિઃ સસ્મિતમબ્રવીત્ ॥ ૫૧॥

ત્વમેવ સર્વલોકાનાં નિવાસસ્થાનમુત્તમમ્ ।
તવાપિ સર્વભૂતાનિ નિવાસસદનાનિ હિ ॥ ૫૨॥

એવં સાધારણં સ્થાનમુક્તં તે રઘુનન્દન ।
સીતયા સહિતસ્યેતિ વિશેષં પૃચ્છતસ્તવ ।
તદ્વક્ષ્યામિ રઘુશ્રેષ્ઠ યત્તે નિયતમન્દિરમ્ ॥ ૫૩॥

શાન્તાનાં સમદૃષ્ટીનામદ્વેષ્ટૄણાં ચ જન્તુષુ ।
ત્વામેવ ભજતાં નિત્યં હૃદયં તેઽધિમન્દિરમ્ ॥ ૫૪॥

ધર્માધર્માન્ પરિત્યજ્ય ત્વામેવ ભજતોઽનિશમ્ ।
સીતયા સહ તે રામ તસ્ય હૃત્સુખમન્દિરમ્ ॥ ૫૫॥

ત્વન્મન્ત્રજાપકો યસ્તુ ત્વામેવ શરણં ગતઃ ।
નિર્દ્વન્દ્વો નિઃસ્પૃહસ્તસ્ય હૃદયં તે સુમન્દિરમ્ ॥ ૫૬॥

નિરહઙ્કારિણઃ શાન્તા યે રાગદ્વેષવર્જિતાઃ ।
સમલોષ્ટાશ્મકનકાસ્તેષાં તે હૃદયં ગૃહમ્ ॥ ૫૭॥

ત્વયિ દત્તમનોબુદ્ધિર્યઃ સન્તુષ્ટઃ સદા ભવેત્ ।
ત્વયિ સન્ત્યક્તકર્મા યસ્તન્મનસ્તે શુભં ગૃહમ્ ॥ ૫૮॥

યો ન દ્વેષ્ટ્યપ્રિયં પ્રાપ્ય પ્રિયં પ્રાપ્ય ન હૃષ્યતિ ।
સર્વં માયેતિ નિશ્ચિત્ય ત્વાં ભજેત્તન્મનો ગૃહમ્ ॥ ૫૯॥

ષડ્ભાવાદિવિકારાન્ યો દેહે પશ્યતિ નાત્મનિ ।
ક્ષુત્તૃટ્ સુખં ભયં દુઃખં પ્રાણબુદ્ધ્યોર્નિરીક્ષતે ॥ ૬૦॥

સંસારધર્મૈર્નિર્મુક્તસ્તસ્ય તે માનસં ગૃહમ્ ॥ ૬૧॥

પશ્યન્તિ યે સર્વગુહાશયસ્થં
ત્વાં ચિદ્ઘનં સત્યમનન્તમેકમ્ ।
અલેપકં સર્વગતં વરેણ્યં
તેષાં હૃદબ્જે સહ સીતયા વસ ॥ ૬૨॥

નિરન્તરાભ્યાસદૃઢીકૃતાત્મનાં
ત્વત્પાદસેવાપરિનિષ્ઠિતાનામ્ ।
ત્વન્નામકીર્ત્યા હતકલ્મષાણાં
સીતાસમેતસ્ય ગૃહં હૃદબ્જે ॥ ૬૩॥

રામ ત્વન્નામમહિમા વર્ણ્યતે કેન વા કથમ્ ।
યત્પ્રભાવાદહં રામ બ્રહ્મર્ષિત્વમવાપ્તવાન્ ॥ ૬૪॥

અહં પુરા કિરાતેષુ કિરાતૈઃ સહ વર્ધિતઃ ।
જન્મમાત્રદ્વિજત્વં મે શૂદ્રાચારરતઃ સદા ॥ ૬૫॥

શૂદ્રાયાં બહવઃ પુત્રા ઉત્પન્ના મેઽજિતાત્મનઃ ।
તતશ્ચોરૈશ્ચ સઙ્ગમ્ય ચૌરોઽહમભવં પુરા ॥ ૬૬॥

ધનુર્બાણધરો નિત્યં જીવાનામન્તકોપમઃ ।
એકદા મુનયઃ સપ્ત દૃષ્ટા મહતિ કાનને ॥ ૬૭॥

સાક્ષાન્મયા પ્રકાશન્તો જ્વલનાર્કસમપ્રભાઃ ।
તાનન્વધાવં લોભેન તેષાં સર્વપરિચ્છદાન્ ॥ ૬૮॥

ગ્રહીતુકામસ્તત્રાહં તિષ્ઠ તિષ્ઠેતિ ચાબ્રવમ્ ।
દૃષ્ટ્વા માં મુનયોઽપૃચ્છન્ કિમાયાસિ દ્વિજાધમ ॥ ૬૯॥

અહં તાનબ્રવં કિઞ્ચિદાદાતું મુનિસત્તમાઃ ।
પુત્રદારાદયઃ સન્તિ બહવો મે બુભુક્ષિતાઃ ॥ ૭૦॥

તેષાં સંરક્ષણાર્થાય ચરામિ ગિરિકાનને ।
તતો મામૂચુરવ્યગ્રાઃ પૃચ્છ ગત્વા કુટુમ્બકમ્ ॥ ૭૧॥

યો યો મયા પ્રતિદિનં ક્રિયતે પાપસઞ્ચયઃ ।
યૂયં તદ્ભાગિનઃ કિં વા નેતિ વેતિપૃથક્પૃથક્ ॥ ૭૨॥

વયં સ્થાસ્યામહે તાવદાગમિષ્યસિ નિશ્ચયઃ ।
તથેત્યુક્ત્વા ગૃહં ગત્વા મુનિભિર્યદુદીરિતમ્ ॥ ૭૩॥

અપૃચ્છં પુત્રદારાદીન્સ્તૈરુક્તોઽહં રઘૂત્તમ ।
પાપં તવૈવ તત્સર્વં વયં તુ ફલભાગિનઃ ॥ ૭૪॥

તચ્છ્રુત્વા જાતનિર્વેદો વિચાર્ય પુનરાગમમ્ ।
મુનયો યત્ર તિષ્ઠન્તિ કરુણાપૂર્ણમાનસાઃ ॥ ૭૫॥

મુનીનાં દર્શનાદેવ શુદ્ધાન્તઃકરણોઽભવમ્ ।
ધનુરાદીન્ પરિત્યજ્ય દણ્ડવત્પતિતોઽસ્મ્યહમ્ ॥ ૭૬॥

રક્ષધ્વં માં મુનિશ્રેષ્ઠા ગચ્છન્તં નિરયાર્ણવમ્ ।
ઇત્યગ્રે પતિતં દૃષ્ટ્વા મામૂચુર્મુનિસત્તમાઃ ॥ ૭૭॥

ઉત્તિષ્ઠોત્તિષ્ઠ ભદ્રં તે સફલઃ સત્સમાગમઃ ।
ઉપદેક્ષ્યામહે તુભ્યં કિઞ્ચિત્તેનૈવ મોક્ષ્યસે ॥ ૭૮॥

પરસ્પરં સમાલોચ્ય દુર્વૃત્તોયં દ્વિજાધમઃ ।
ઉપેક્ષ્ય એવ સદ્વૃત્તૈસ્તથાપિ શરણં ગતઃ ।
રક્ષણીયઃ પ્રયત્નેન મોક્ષમાર્ગોપદેશતઃ ॥ ૭૯॥

ઇત્યુક્ત્વા રામ તે નામ વ્યત્યસ્તાક્ષરપૂર્વકમ્ ।
એકાગ્રમનસાત્રૈવ મરેતિ જપ સર્વદા ॥ ૮૦॥

આગચ્છામઃ પુનર્યાવત્તાવદુક્તં સદા જપ ।
ઇત્યુક્ત્વા પ્રયયુઃ સર્વે મુનયો દિવ્યદર્શનાઃ ॥ ૮૧॥

અહં યથોપદિષ્ટં તૈસ્તથાકરવમઞ્જસા ।
જપન્નેકાગ્રમનસા બાહ્યં વિસ્મૃતવાનહમ્ ॥ ૮૨॥

એવં બહુતિથે કાલે ગતે નિશ્ચલરૂપિણઃ ।
સર્વસઙ્ગવિહીનસ્ય વલ્મીકોઽભૂન્મમોપરિ ॥ ૮૩॥

તતો યુગસહસ્રાન્તે ઋષયઃ પુનરાગમન્ ।
મામૂચુર્નિષ્ક્રમસ્વેતિ તચ્છ્રુત્વા તૂર્ણમુત્થિતઃ ॥ ૮૪॥

વલ્મીકાન્નિર્ગતશ્ચાહં નીહારાદિવ ભાસ્કરઃ ।
મામપ્યાહુર્મુનિગણા વાલ્મીકિસ્ત્વં મુનીશ્વર ॥ ૮૫॥

વલ્મીકાત્સમ્ભવો યસ્માદ્ દ્વિતીયં જન્મ તેઽભવત્ ।
ઇત્યુક્ત્વા તે યયુર્દિવ્યગતિં રઘુકુલોત્તમ ॥ ૮૬॥

અહં તે રામ નામ્નશ્ચ પ્રભાવાદીદૃશોઽભવમ્ ।

અથ સાક્ષાત્પ્રપશ્યામિ સસીતં લક્ષ્મણેન ચ ॥ ૮૭॥

રામં રાજીવપત્રાક્ષં ત્વાં મુક્તો નાત્ર સંશયઃ ।
આગચ્છ રામ ભદ્રં તે સ્થલં વૈ દર્શયામ્યહમ્ ॥ ૮૮॥

એવમુક્ત્વા મુનિઃ શ્રીમાન્લ્લક્ષ્મણેન સમન્વિતઃ ।
શિષ્યૈઃ પરિવૃતો ગત્વા મધ્યે પર્વતગઙ્ગયોઃ ॥ ૮૯॥

તત્ર શાલાં સુવિસ્તીર્ણાં કારયામાસ વાસભૂઃ ।
પ્રાક્પશ્ચિમં દક્ષિણોદક્ શોભનં મન્દિરદ્વયમ્ ॥ ૯૦॥

જાનક્યા સહિતો રામો લક્ષ્મણેન સમન્વિતઃ ।
તત્ર તે દેવસદૃશા હ્યવસન્ ભવનોત્તમે ॥ ૯૧॥

વાલ્મીકિના તત્ર સુપૂજિતોઽયં
રામઃ સસીતઃ સહ લક્ષ્મણેન ।
દેવૈર્મુનીદ્રૈઃ સહિતો મુદાસ્તે
સ્વર્ગે યથા દેવપતિઃ સશચ્યા ॥ ૯૨॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અયોધ્યાકાણ્ડે ષષ્ઠઃ સર્ગઃ ॥ ૬॥

## ॥ સપ્તમઃ સર્ગઃ ॥

સુમન્ત્રોઽપિ તદાયોધ્યાં દિનાન્તે પ્રવિવેશ હ ।
વસ્ત્રેણ મુખમાચ્છાદ્ય બાષ્પાકુલિતલોચનઃ ॥ ૧॥

બહિરેવ રથં સ્થાપ્ય રાજાનં દ્રષ્ટુમાયયૌ ।
જયશબ્દેન રાજાનં સ્તુત્વા તં પ્રણનામ હ ॥ ૨॥

તતો રાજા નમન્તં તં સુમન્ત્રં વિહ્વલોઽબ્રવીત્ ।
સુમન્ત્ર રામઃ કુત્રાસ્તે સીતયા લક્ષ્મણેન ચ ॥ ૩॥

કુત્ર ત્યક્તસ્ત્વયા રામઃ કિં માં પાપિનમબ્રવીત્ ।
સીતા વા લક્ષ્મણો વાપિ નિર્દયં માં કિમબ્રવીત્ ॥ ૪॥

હા રામ હા ગુણનિધે હા સીતે પ્રિયવાદિનિ ।
દુઃખાર્ણવે નિમગ્નં માં મ્રિયમાણં ન પશ્યસિ ॥ ૫॥

વિલપ્યૈવં ચિરં રાજા નિમગ્નો દુઃખસાગરે ।
એવં મન્ત્રી રુદન્તં તં પ્રાઞ્જલિર્વાક્યમબ્રવીત્ ॥ ૬॥

રામઃ સીતા ચ સૌમિત્રિર્મયા નીતા રથેન તે ।
શૃઙ્ગવેરપુરાભ્યાશે ગઙ્ગાકૂલે વ્યવસ્થિતાઃ ॥ ૭॥

ગુહેન કિઞ્ચિદાનીતં ફલમૂલાદિકં ચ યત્ ।
સ્પૃષ્ટ્વા હસ્તેન સમ્પ્રીત્યા નાગ્રહીદ્વિસસર્જ તત્ ॥ ૮॥

વટક્ષીરં સમાનાય્ય ગુહેન રઘુનન્દનઃ ।
જટામુકુટમાબદ્ધ્ય મામાહ નૃપતે સ્વયમ્ ॥ ૯॥

સુમન્ત્ર બ્રૂહિ રાજાનં શોકસ્તેઽસ્તુ ન મત્કૃતે ।
સાકેતાદધિકં સૌખ્યં વિપિને નો ભવિષ્યતિ ॥ ૧૦॥

માતુર્મે વન્દનં બ્રૂહિ શોકં ત્યજતુ મત્કૃતે ।
આશ્વાસયતુ રાજાનં વૃદ્ધં શોકપરિપ્લુતમ્ ॥ ૧૧॥

સીતા ચાશ્રુપરીતાક્ષી મામાહ નૃપસત્તમ ।
દુઃખગદ્ગદયા વાચા રામં કિઞ્ચિદવેક્ષતી ॥ ૧૨॥

સાષ્ટાઙ્ગં પ્રણિપાતં મે બ્રૂહિ શ્વશ્ર્વોઃ પદામ્બુજે ।
ઇતિ પ્રરુદતી સીતા ગતા કિઞ્ચિદવાઙ્મુખી ॥ ૧૩॥

તતસ્તેઽશ્રુપરીતાક્ષા નાવમારુરુહુસ્તદા ।
યાવદ્ગઙ્ગાં સમુત્તીર્ય ગતાસ્તાવદહં સ્થિતઃ ॥ ૧૪॥

તતો દુઃખેન મહતા પુનરેવાહમાગતઃ ।
તતો રુદન્તી કૌસલ્યા રાજાનમિદમબ્રવીત્ ॥ ૧૫॥

કૈકેય્યૈ પ્રિયભાર્યાયૈ પ્રસન્નો દત્તવાન્ વરમ્ ।
ત્વં રાજ્યં દેહિ તસ્યૈવ મત્પુત્રઃ કિં વિવાસિતઃ ॥ ૧૬॥

કૃત્વા ત્વમેવ તત્સર્વમિદાનીં કિં નુ રોદિષિ ।
કૌસલ્યાવચનં શ્રુત્વા ક્ષતે સ્પૃષ્ટ ઇવાગ્નિના ॥ ૧૭॥

પુનઃ શોકાશ્રુપૂર્ણાક્ષઃ કૌસલ્યામિદમબ્રવીત્ ।
દુઃખેન મ્રિયમાણં માં કિં પુનર્દુઃખયસ્યલમ્ ॥ ૧૮॥

ઇદાનીમેવ મે પ્રાણા ઉત્ક્રમિષ્યન્તિ નિશ્ચયઃ ।

શપ્તોઽહં બાલ્યભાવેન કેનચિન્મુનિના પુરા ॥ ૧૯॥

પુરાહં યૌવને દૃપ્તશ્ચાપબાણધરો નિશિ ।
અચરં મૃગયાસક્તો નદ્યાસ્તીરે મહાવને ॥ ૨૦॥

તત્રાર્ધરાત્રસમયે મુનિઃ કશ્ચિત્તૃષાર્દિતઃ ।
પિપાસાર્દિતયોઃ પિત્રોર્જલમાનેતુમુદ્યતઃ ।
અપૂરયજ્જલે કુમ્ભં તદા શબ્દોઽભવન્મહાન્ ॥ ૨૧॥

ગજઃ પિબતિ પાનીયમિતિ મત્વા મહાનિશિ ।
બાણં ધનુષિ સન્ધાય શબ્દવેધિનમક્ષિપમ્ ॥ ૨૨॥

હા હતોઽસ્મીતિ તત્રાભૂચ્છબ્દો માનુષસૂચકઃ ।
કસ્યાપિ ન કૃતો દોષો મયા કેન હતો વિધે ॥ ૨૩॥

પ્રતીક્ષતે માં માતા ચ પિતા ચ જલકાઙ્ક્ષયા ।
તચ્છ્રુત્વા ભયસન્ત્રસ્તસ્તતોઽહં પૌરુષં વચઃ ॥ ૨૪॥

શનૈર્ગત્વાથ તત્પાર્શ્વં સ્વામિન્ દશરથોઽસ્મ્યહમ્ ।
અજાનતા મયા વિદ્ધસ્ત્રાતુમર્હસિ માં મુને ॥ ૨૫॥

ઇત્યુક્ત્વા પાદયોસ્તસ્ય પતિતો ગદ્ગદાક્ષરઃ ।
તદા મામાહ સ મુનિર્મા ભૈષીર્નૃપસત્તમ ॥ ૨૬॥

બ્રહ્મહત્યા સ્પૃશેન્ન ત્વાં વૈશ્યોઽહં તપસિ સ્થિતઃ ।
પિતરૌ માં પ્રતીક્ષેતે ક્ષુત્તૃડ્ભ્યાં પરિપીડિતૌ ॥ ૨૭॥

તયોસ્ત્વમુદકં દેહિ શીઘ્રમેવાવિચારયન્ ।
ન ચેત્ત્વાં ભસ્મસાત્કુર્યાત્પિતા મે યદિ કુપ્યતિ ॥ ૨૮॥

જલં દત્વા તુ તૌ નત્વા કૃતં સર્વં નિવેદય ।
શલ્યમુદ્ધર મે દેહાત્પ્રાણાન્સ્ત્યક્ષ્યામિ પીડિતઃ ॥ ૨૯॥

ઇત્યુક્તો મુનિના શીઘ્રં બાણમુત્પાટ્ય દેહતઃ ।
સજલં કલશં ધૃત્વા ગતોઽહં યત્ર દમ્પતી ॥ ૩૦॥

અતિવૃદ્ધાવન્ધદૃશૌ ક્ષુત્પિપાસાર્દિતૌ નિશિ ।
નાયાતિ સલિલં ગૃહ્ય પુત્રઃ કિં વાત્ર કારણમ્ ॥ ૩૧॥

અનન્યગતિકૌ વૃદ્ધૌ શોચ્યૌ તૃટ્પરિપીડિતૌ ।
આવામુપેક્ષતે કિં વા ભક્તિમાનાવયોઃ સુતઃ ॥ ૩૨॥

ઇતિ ચિન્તાવ્યાકુલૌ તૌ મત્પાદન્યાસજં ધ્વનિમ્ ।
શ્રુત્વા પ્રાહ પિતા પુત્ર કિં વિલમ્બઃ કૃતસ્ત્વયા ॥ ૩૩॥

દેહ્યાવયોઃ સુપાનીયં પિબ ત્વમપિ પુત્રક ।
ઇત્યેવં લપતોર્ભીત્યા સકાશમગમં શનૈઃ ॥ ૩૪॥

પાદયોઃ પ્રણિપત્યાહમબ્રવં વિનયાન્વિતઃ ।
નાહં પુત્રસ્ત્વયોધ્યાયા રાજા દશરથોઽસ્મ્યહમ્ ॥ ૩૫॥

પાપોઽહં મૃગયાસક્તો રાત્રૌ મૃગવિહિંસકઃ ।
જલાવતારાદ્દૂરેઽહં સ્થિત્વા જલગતં ધ્વનિમ્ ॥ ૩૬॥

શ્રુત્વાહં શબ્દવેધિત્વાદેકં બાણમથાત્યજમ્ ।
હતોઽસ્મીતિ ધ્વનિં શ્રુત્વા ભયાત્તત્રાહમાગતઃ ॥ ૩૭॥

જટાં વિકીર્ય પતિતં દૃષ્ટ્વાહં મુનિદારકમ્ ।
ભીતો ગૃહીત્વા તત્પાદૌ રક્ષ રક્ષેતિ ચાબ્રવમ્ ॥ ૩૮॥

મા ભૈષીરિતિ માં પ્રાહ બ્રહ્મહત્યાભયં ન તે ।
મત્પિત્રોઃ સલિલં દત્ત્વા નત્વા પ્રાર્થય જીવિતમ્ ॥ ૩૯॥

ઇત્યુક્તો મુનિના તેન હ્યાગતો મુનિહિંસકઃ ।
રક્ષેતાં માં દયાયુક્તૌ યુવાં હિ શરણાગતમ્ ॥ ૪૦॥

ઇતિ શ્રુત્વા તુ દુઃખાર્તૌ વિલપ્ય બહુ શોચ્ય તમ્ ।
પતિતો નૌ સુતો યત્ર નય તત્રાવિલમ્બયન્ ॥ ૪૧॥

તતો નીતૌ સુતો યત્ર મયા તૌ વૃદ્ધદમ્પતી ।
સ્પૃષ્ટ્વા સુતં તૌ હસ્તાભ્યાં બહુશોઽથ વિલેપતુઃ ॥ ૪૨॥

હાહેતિ ક્રન્દમાનૌ તૌ પુત્ર પુત્રેત્યવોચતામ્ ।
જલં દેહીતિ પુત્રેતિ કિમર્થં ન દદાસ્યલમ્ ॥ ૪૩॥

તતો મામૂચતુઃ શીઘ્રં ચિતિં રચય ભૂપતે ।
મયા તદૈવ રચિતા ચિતિસ્તત્ર નિવેશિતાઃ ।
ત્રયસ્તત્રાગ્નિરુત્સૃષ્ટો દગ્ધાસ્તે ત્રિદિવં યયુઃ ॥ ૪૪॥

તત્ર વૃદ્ધઃ પિતા પ્રાહ ત્વમપ્યેવં ભવિષ્યસિ ।
પુત્રશોકેન મરણં પ્રાપ્સ્યસે વચનાન્મમ ॥ ૪૫॥

સ ઇદાનીં મમ પ્રાપ્તઃ શાપકાલોઽનિવારિતઃ ।
ઇત્યુક્ત્વા વિલલાપાથ રાજા શોકસમાકુલઃ ॥ ૪૬॥

હા રામ પુત્ર હા સીતે હા લક્ષ્મણ ગુણાકર ।
ત્વદ્વિયોગાદહં પ્રાપ્તો મૃત્યું કૈકેયિસમ્ભવમ્ ॥ ૪૭॥

વદન્નેવં દશરથઃ પ્રાણાન્સ્ત્યક્ત્વા દિવં ગતઃ ।
કૌસલ્યા ચ સુમિત્રા ચ તથાન્યા રાજયોષિતઃ ॥ ૪૮॥

ચુક્રુશુશ્ચ વિલેપુશ્ચ ઉરસ્તાડનપૂર્વકમ્ ।
વસિષ્ઠઃ પ્રયયૌ તત્ર પ્રાતર્મન્ત્રિભિરાવૃતઃ ॥ ૪૯॥

તૈલદ્રોણ્યાં દશરથં ક્ષિપ્ત્વા દૂતાનથાબ્રવીત્ ।
ગચ્છત ત્વરિતં સાશ્વા યુધાજિન્નગરં પ્રતિ ॥ ૫૦॥

તત્રાસ્તે ભરતઃ શ્રીમાઞ્છત્રુઘ્નસહિતઃ પ્રભુઃ ।
ઉચ્યતાં ભરતઃ શીઘ્રમાગચ્છેતિ મમાજ્ઞયા ॥ ૫૧॥

અયોધ્યાં પ્રતિ રાજાનં કૈકેયીં ચાપિ પશ્યતુ ।
ઇત્યુક્તાસ્ત્વરિતં દૂતા ગત્વા ભરતમાતુલમ્ ॥ ૫૨॥

યુધાજિતં પ્રણમ્યોચુર્ભરતં સાનુજં પ્રતિ ।
વસિષ્ઠસ્ત્વબ્રવીદ્રાજન્ ભરતઃ સાનુજઃ પ્રભુઃ ॥ ૫૩॥

શીઘ્રમાગચ્છતુ પુરીમયોધ્યામવિચારયન્ ।
ઇત્યાજ્ઞપ્તોઽથ ભરતસ્ત્વરિતં ભયવિહ્વલઃ ॥ ૫૪॥

આયયૌ ગુરુણાદિષ્ટઃ સહ દૂતૈસ્તુ સાનુજઃ ।
રાજ્ઞો વા રાઘવસ્યાપિ દુઃખં કિઞ્ચિદુપસ્થિતમ્ ॥ ૫૫॥

ઇતિ ચિન્તાપરો માર્ગે ચિન્તયન્નગરં યયૌ ।
નગરં ભ્રષ્ટલક્ષ્મીકં જનસમ્બાધવર્જિતમ્ ॥ ૫૬॥

ઉત્સવૈશ્ચ પરિત્યક્તં દૃષ્ટ્વા ચિન્તાપરોઽભવત્ ।
પ્રવિશ્ય રાજભવનં રાજલક્ષ્મીવિવર્જિતમ્ ॥ ૫૭॥

અપશ્યત્કૈકેયીં તત્ર એકામેવાસને સ્થિતામ્ ।
નનામ શિરસા પાદૌ માતુર્ભક્તિસમન્વિતઃ ॥ ૫૮॥

આગતં ભરતં દૃષ્ટ્વા કૈકેયી પ્રેમસમ્ભ્રમાત્ ।
ઉત્થાયાલિઙ્ગ્ય રભસા સ્વાઙ્કમારોપ્ય સંસ્થિતા ॥ ૫૯॥

મૂર્ધ્ન્યવઘ્રાય પપ્રચ્છ કુશલં સ્વકુલસ્ય સા ।
પિતા મે કુશલો ભ્રાતા માતા ચ શુભલક્ષણા ॥ ૬૦॥

દિષ્ટ્યા ત્વમદ્ય કુશલી મયા દૃષ્ટોઽસિ પુત્રક ।
ઇતિ પૃષ્ટઃ સ ભરતો માત્રા ચિન્તાકુલેન્દ્રિયઃ ॥ ૬૧॥

દૂયમાનેન મનસા માતરં સમપૃચ્છત ।
માતઃ પિતા મે કુત્રાસ્તે એકા ત્વમિહ સંસ્થિતા ॥ ૬૨॥

ત્વયા વિના ન મે તાતઃ કદાચિદ્રહસિ સ્થિતઃ ।
ઇદાનીં દૃશ્યતે નૈવ કુત્ર તિષ્ઠતિ મે વદ ॥ ૬૩॥

અદૃષ્ટ્વા પિતરં મેઽદ્ય ભયં દુઃખં ચ જાયતે ।
અથાહ કૈકેયી પુત્ર કિં દુઃખેન તવાનઘ ॥ ૬૪॥

યા ગતિર્ધર્મશીલાનામશ્વમેધાદિયાજિનામ્ ।
તાં ગતિં ગતવાનદ્ય પિતા તે પિતૃવત્સલ ॥ ૬૫॥

તચ્છ્રુત્વા નિપપાતોર્વ્યાં ભરતઃ શોકવિહ્વલઃ ।
હા તાત ક્વ ગતોઽસિ ત્વં ત્યક્ત્વા માં વૃજિનાર્ણવે ॥ ૬૬॥

અસમર્પ્યૈવ રામાય રાજ્ઞે માં ક્વ ગતોઽસિ ભોઃ ।
ઇતિ વિલપિતં પુત્રં પતિતં મુક્તમૂર્ધજમ્ ॥ ૬૭॥

ઉત્થાપ્યામૃજ્ય નયને કૈકેયી પુત્રમબ્રવીત્ ।
સમાશ્વસિહિ ભદ્રં તે સર્વં સમ્પાદિતં મયા ॥ ૬૮॥

તામાહ ભરતસ્તાતો મ્રિયમાણઃ કિમબ્રવીત્ ।
તમાહ કૈકેયી દેવી ભરતં ભયવર્જિતા ॥ ૬૯॥

હા રામ રામ સીતેતિ લક્ષ્મણેતિ પુનઃ પુનઃ ।
વિલપન્નેવ સુચિરં દેહં ત્યક્ત્વા દિવં યયૌ ॥ ૭૦॥

તામાહ ભરતો હેઽમ્બ રામઃ સન્નિહિતો ન કિમ્ ।
તદાનીં લક્ષ્મણો વાપિ સીતા વા કુત્ર તે ગતાઃ ॥ ૭૧॥

રામસ્ય યૌવરાજ્યાર્થં પિત્રા તે સમ્ભ્રમઃ કૃતઃ ।
તવ રાજ્યપ્રદાનાય તદાહં વિઘ્નમાચરમ્ ॥ ૭૨॥

રાજ્ઞા દત્તં હિ મે પૂર્વં વરદેન વરદ્વયમ્ ।

યાચિતં તદિદાનીં મે તયોરેકેન તેઽખિલમ્ ॥ ૭૩॥

રાજ્યં રામસ્ય ચૈકેન વનવાસો મુનિવ્રતમ્ ।
તતઃ સત્યપરો રાજા રાજ્યં દત્ત્વા તવૈવ હિ ॥ ૭૪॥

રામં સમ્પ્રેષયામાસ વનમેવ પિતા તવ ।
સીતાપ્યનુગતા રામં પાતિવ્રત્યમુપાશ્રિતા ॥ ૭૫॥

સૌભ્રાત્રં દર્શયન્ રામમનુયાતોઽપિ લક્ષ્મણઃ ।
વનં ગતેષુ સર્વેષુ રાજા તાનેવ ચિન્તયન્ ॥ ૭૬॥

પ્રલપન્ રામરામેતિ મમાર નૃપસત્તમઃ ।
ઇતિ માતુર્વચઃ શ્રુત્વા વજ્રાહત ઇવ દ્રુમઃ ॥ ૭૭॥

પપાત ભૂમૌ નિઃસઞ્જ્ઞસ્તં દૃષ્ટ્વા દુઃખિતા તદા ।
કૈકેયી પુનરપ્યાહ વત્સ શોકેન કિં તવ ॥ ૭૮॥

રાજ્યે મહતિ સમ્પ્રાપ્તે દુઃખસ્યાવસરઃ કુતઃ ।
ઇતિ બ્રુવન્તીમાલોક્ય માતરં પ્રદહન્નિવ ॥ ૭૯॥

અસમ્ભાષ્યાસિ પાપે મે ઘોરે ત્વં ભર્તૃઘાતિની ।
પાપે ત્વદ્ગર્ભજાતોઽહં પાપવાનસ્મિ સામ્પ્રતમ્ ।
અહમગ્નિં પ્રવેક્ષ્યામિ વિષં વા ભક્ષયામ્યહમ્ ॥ ૮૦॥

ખડ્ગેન વાથ ચાત્માનં હત્વા યામિ યમક્ષયમ્ ।
ભર્તૃઘાતિનિ દુષ્ટે ત્વં કુમ્ભીપાકં ગમિષ્યસિ ॥ ૮૧॥

ઇતિ નિર્ભર્ત્સ્ય કૈકેયીં કૌસલ્યાભવનં યયૌ ।
સાપિ તં ભરતં દૃષ્ટ્વા મુક્તકણ્ઠા રુરોદ હ ॥ ૮૨॥

પાદયોઃ પતિતસ્તસ્યા ભરતોઽપિ તદાઽરુદત્ ।
આલિઙ્ગ્ય ભરતં સાધ્વી રામમાતા યશસ્વિની ।
કૃશાઽતિદીનવદના સાશ્રુનેત્રેદમબ્રવીત્ ॥ ૮૩॥

પુત્ર ત્વયિ ગતે દૂરમેવં સર્વમભૂદિદમ્ ।
ઉક્તં માત્રા શ્રુતં સર્વં ત્વયા તે માતૃચેષ્ટિતમ્ ॥ ૮૪॥

પુત્રઃ સભાર્યો વનમેવ યાતઃ
સલક્ષ્મણો મે રઘુરામચન્દ્રઃ ।
ચીરામ્બરો બદ્ધજટાકલાપઃ

સન્ત્યજ્ય માં દુઃખસમુદ્રમગ્નામ્ ॥ ૮૫॥

હા રામ હા મે રઘુવંશનાથ
જાતોઽસિ મે ત્વં પરતઃ પરાત્મા ।
તથાપિ દુઃખં ન જહાતિ માં વૈ
વિધિર્બલીયાનિતિ મે મનીષા ॥ ૮૬॥

સ એવં ભરતો વીક્ષ્ય વિલપન્તીં ભૃશં શુચા ।
પાદૌ ગૃહીત્વા પ્રાહેદં શૃણુ માતર્વચો મમ ॥ ૮૭॥

કૈકેય્યા યત્કૃતં કર્મ રામરાજ્યાભિષેચને ।
અન્યદ્વા યદિ જાનામિ સા મયા નોદિતા યદિ ॥ ૮૮॥

પાપં મેઽસ્તુ તદા માતર્બ્રહ્મહત્યાશતોદ્ભવમ્ ।
હત્વા વસિષ્ઠં ખડ્ગેન અરુન્ધત્યા સમન્વિતમ્ ॥ ૮૯॥

ભૂયાત્તત્પાપમખિલં મમ જાનામિ યદ્યહમ્ ।
ઇત્યેવં શપથં કૃત્વા રુરોદ ભરતસ્તદા ॥ ૯૦॥

કૌસલ્યા તમથાલિઙ્ગ્ય પુત્ર જાનામિ મા શુચઃ ।
એતસ્મિન્નન્તરે શ્રુત્વા ભરતસ્ય સમાગમમ્ ॥ ૯૧॥

વસિષ્ઠો મન્ત્રિભિઃ સાર્ધં પ્રયયૌ રાજમન્દિરમ્ ।
રુદન્તં ભરતં દૃષ્ટ્વા વસિષ્ઠઃ પ્રાહ સાદરમ્ ॥ ૯૨॥

વૃદ્ધો રાજા દશરથો જ્ઞાની સત્યપરાક્રમઃ ।
ભુક્ત્વા મર્ત્યસુખં સર્વમિષ્ટ્વા વિપુલદક્ષિણૈઃ ॥ ૯૩॥

અશ્વમેધાદિભિર્યજ્ઞૈર્લબ્ધ્વા રામં સુતં હરિમ્ ।
અન્તે જગામ ત્રિદિવં દેવેન્દ્રાર્દ્ધાસનં પ્રભુઃ ॥ ૯૪॥

તં શોચસિ વૃથૈવ ત્વમશોચ્યં મોક્ષભાજનમ્ ।
આત્મા નિત્યોઽવ્યયઃ શુદ્ધો જન્મનાશાદિવર્જિતઃ ॥ ૯૫॥

શરીરં જડમત્યર્થમપવિત્રં વિનશ્વરમ્ ।
વિચાર્યમાણે શોકસ્ય નાવકાશઃ કથઞ્ચન ॥ ૯૬॥

પિતા વા તનયો વાપિ યદિ મૃત્યુવશં ગતઃ ।
મૂઢાસ્તમનુશોચન્તિ સ્વાત્મતાડનપૂર્વકમ્ ॥ ૯૭॥

નિઃસારે ખલુ સંસારે વિયોગો જ્ઞાનિનાં યદા ।

ભવેદ્વૈરાગ્યહેતુઃ સ શાન્તિસૌખ્યં તનોતિ ચ ॥ ૯૮॥

જન્મવાન્ યદિ લોકેઽસ્મિન્સ્તર્હિ તં મૃત્યુરન્વગાત્ ।
તસ્માદપરિહાર્યોઽયં મૃત્યુર્જન્મવતાં સદા ॥ ૯૯॥

સ્વકર્મવશતઃ સર્વજન્તૂનાં પ્રભવાપ્યયૌ ।
વિજાનન્નપ્યવિદ્વાન્ યઃ કથં શોચતિ બાન્ધવાન્ ॥ ૧૦૦॥

બ્રહ્માણ્ડકોટયો નષ્ટાઃ સૃષ્ટયો બહુશો ગતાઃ ।
શુષ્યન્તિ સાગરાઃ સર્વે કૈવાસ્થા ક્ષણજીવિતે ॥ ૧૦૧॥

ચલપત્રાન્તલગ્નામ્બુબિન્દુવત્ક્ષણભઙ્ગુરમ્ ।
આયુસ્ત્યજત્યવેલાયાં કસ્તત્ર પ્રત્યયસ્તવ ॥ ૧૦૨॥

દેહી પ્રાક્તનદેહોત્થકર્મણા દેહવાન્ પુનઃ ।
તદ્દેહોત્થેન ચ પુનરેવં દેહઃ સદાત્મનઃ ॥ ૧૦૩॥

યથા ત્યજતિ વૈ જીર્ણં વાસો ગૃહ્ણાતિ નૂતનમ્ ।
તથા જીર્ણં પરિત્યજ્ય દેહી દેહં પુનર્નવમ્ ॥ ૧૦૪॥

ભજત્યેવ સદા તત્ર શોકસ્યાવસરઃ કુતઃ ।
આત્મા ન મ્રિયતે જાતુ  જાયતે ન ચ વર્ધતે ॥ ૧૦૫॥

ષડ્ભાવરહિતોઽનન્તઃ  સત્યપ્રજ્ઞાનવિગ્રહઃ ।
આનન્દરૂપો બુદ્ધ્યાદિસાક્ષી લયવિવર્જિતઃ ॥ ૧૦૬॥

એક એવ પરો હ્યાત્મા હ્યદ્વિતીયઃ સમઃ સ્થિતઃ ।
ઇત્યાત્માનં દૃઢં જ્ઞાત્વા ત્યક્ત્વા શોકં કુરુ ક્રિયામ્ ॥ ૧૦૭॥

તૈલદ્રોણ્યાઃ પિતુર્દેહમુદ્ધૃત્ય સચિવૈઃ સહ ।
કૃત્યં કુરુ યથાન્યાયમસ્માભિઃ કુલનન્દન ॥ ૧૦૮॥

ઇતિ સમ્બોધિતઃ સાક્ષાદ્ગુરુણા ભરતસ્તદા ।
વિસૃજ્યાજ્ઞાનજં શોકં ચક્રે સવિધિવત્ક્રિયામ્ ॥ ૧૦૯॥

ગુરુણોક્તપ્રકારેણ આહિતાગ્નેર્યથાવિધિ ।
સંસ્કૃત્ય સ પિતુર્દેહં વિધિદૃષ્ટેન કર્મણા ॥ ૧૧૦॥

એકાદશેઽહનિ પ્રાપ્તે બ્રાહ્મણાન્ વેદપારગાન્ ।
ભોજયામાસ વિધિવચ્છતશોઽથ સહસ્રશઃ ॥ ૧૧૧॥

ઉદ્દિશ્ય પિતરં તત્ર બ્રાહ્મણેભ્યો ધનં બહુ ।
દદૌ ગવાં સહસ્રાણિ ગ્રામાન્ રત્નામ્બરાણિ ચ ॥ ૧૧૨॥

અવસત્સ્વગૃહે યત્ર રામમેવાનુચિન્તયન્ ।
વસિષ્ઠેન સહ ભ્રાત્રા મન્ત્રિભિઃ પરિવારિતઃ ॥ ૧૧૩॥

રામેઽરણ્યં પ્રયાતે સહ જનકસુતાલક્ષ્મણાભ્યાં સુઘોરં
માતા મે રાક્ષસીવ પ્રદહતિ હૃદયં દર્શનાદેવ સદ્યઃ ।
ગચ્છામ્યારણ્યમદ્ય સ્થિરમતિરખિલં દૂરતોઽપાસ્ય રાજ્યં
રામં સીતાસમેતં સ્મિતરુચિરમુખં નિત્યમેવાનુસેવે ॥ ૧૧૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અયોધ્યાકાણ્ડે સપ્તમઃ સર્ગઃ ॥ ૭॥

## ॥ અષ્ટમઃ સર્ગઃ ॥

વસિષ્ઠો મુનિભિઃ સાર્ધં મન્ત્રિભિઃ પરિવારિતઃ ।
રાજ્ઞઃ સભાં દેવસભાસન્નિભામવિશદ્વિભુઃ ॥ ૧॥

તત્રાસને સમાસીનશ્ચતુર્મુખ ઇવાપરઃ ।
આનીય ભરતં તત્ર ઉપવેશ્ય સહાનુજમ્ ॥ ૨॥

અબ્રવીદ્વચનં દેશકાલોચિતમરિન્દમમ્ ।
વત્સ રાજ્યેઽભિષેક્ષ્યામસ્ત્વામદ્ય પિતૃશાસનાત્ ॥ ૩॥

કૈકેય્યા યાચિતં રાજ્યં ત્વદર્થે પુરુષર્ષભ ।
સત્યસન્ધો દશરથઃ પ્રતિજ્ઞાય દદૌ કિલ ॥ ૪॥

અભિષેકો ભવત્વદ્ય મુનિભિર્મન્ત્રપૂર્વકમ્ ।
તચ્છ્રુત્વા ભરતોઽપ્યાહ મમ રાજ્યેન કિં મુને ॥ ૫॥

રામો રાજાધિરાજશ્ચ વયં તસ્યૈવ કિઙ્કરાઃ ।
શ્વઃ પ્રભાતે ગમિષ્યામો રામમાનેતુમઞ્જસા ॥ ૬॥

અહં યૂયં માતરશ્ચ કૈકેયીં રાક્ષસીં વિના ।
હનિષ્યામ્યધુનૈવાહં કૈકેયીં માતૃગન્ધિનીમ્ ॥ ૭॥

કિન્તુ માં નો રઘુશ્રેષ્ઠઃ સ્ત્રીહન્તારં સહિષ્યતે ।

તચ્છ્વોભૂતે ગમિષ્યામિ પાદચારેણ દણ્ડકાન્ ॥ ૮॥

શત્રુઘ્નસહિતસ્તૂર્ણં યૂયમાયાત વા ન વા ।
રામો યથા વને યાતસ્તથાહં વલ્કલામ્બરઃ ॥ ૯॥

ફલમૂલકૃતાહારઃ શત્રુઘ્નસહિતો મુને ।
ભૂમિશાયી જટાધારી યાવદ્રામો નિવર્તતે ॥ ૧૦॥

ઇતિ નિશ્ચિત્ય ભરતસ્તૂષ્ણીમેવાવતસ્થિવાન્ ।
સાધુસાધ્વિતિ તં સર્વે પ્રશશંસુર્મુદાન્વિતાઃ ॥ ૧૧॥

તતઃ પ્રભાતે ભરતં ગચ્છન્તં સર્વસૈનિકાઃ ।
અનુજગ્મુઃ સુમન્ત્રેણ નોદિતાઃ સાશ્વકુઞ્જરાઃ ॥ ૧૨॥

કૌસલ્યાદ્યા રાજદારા વસિષ્ઠપ્રમુખા દ્વિજાઃ ।
છાદયન્તો ભુવં સર્વે પૃષ્ઠતઃ પાર્શ્વતોઽગ્રતઃ ॥ ૧૩॥

શૃઙ્ગવેરપુરં ગત્વા ગઙ્ગાકૂલે સમન્તતઃ ।
ઉવાસ મહતી સેના શત્રુઘ્નપરિચોદિતા ॥ ૧૪॥

આગતં ભરતં શ્રુત્વા ગુહઃ શઙ્કિતમાનસઃ ।
મહત્યા સેનયા સાર્ધમાગતો ભરતઃ કિલ ॥ ૧૫॥

પાપં કર્તું ન વા યાતિ રામસ્યાવિદિતાત્મનઃ ।
ગત્વા તદ્ધૃદયં જ્ઞેયં યદિ શુદ્ધસ્તરિષ્યતિ ॥ ૧૬॥

ગઙ્ગા નો ચેત્સમાકૃષ્ય નાવસ્તિષ્ઠન્તુ સાયુધાઃ ।
જ્ઞાતયો મે સમાયત્તાઃ પશ્યન્તઃ સર્વતોદિશમ્ ॥ ૧૭॥

ઇતિ સર્વાન્ સમાદિશ્ય ગુહો ભરતમાગતઃ ।
ઉપાયનાનિ સઙ્ગૃહ્ય વિવિધાનિ બહૂન્યપિ ॥ ૧૮॥

પ્રયયૌ જ્ઞાતિભિઃ સાર્ધં બહુભિર્વિવિધાયુધૈઃ ।
નિવેદ્યોપાયનાન્યગ્રે ભરતસ્ય સમન્તતઃ ॥ ૧૯॥

દૃષ્ટ્વા ભરતમાસીનં સાનુજં સહ મન્ત્રિભિઃ ।
ચીરામ્બરં ઘનશ્યામં જટામુકુટધારિણમ્ ॥ ૨૦॥

રામમેવાનુશોચન્તં રામરામેતિ વાદિનમ્ ।
નનામ શિરસા ભૂમૌ ગુહોઽહમિતિ ચાબ્રવીત્ ॥ ૨૧॥

શીઘ્રમુત્થાપ્ય ભરતો ગાઢમાલિઙ્ગ્ય સાદરમ્ ।
પૃષ્ટ્વાઽનામયમવ્યગ્રઃ સખાયમિદમબ્રવીત્ ॥ ૨૨॥

ભ્રાતસ્ત્વં રાઘવેણાત્ર સમેતઃ સમવસ્થિતઃ ।
રામેણાલિઙ્ગિતઃ સાર્દ્રનયનેનામલાત્મના ॥ ૨૩॥

ધન્યોઽસિ કૃતકૃત્યોઽસિ યત્ત્વયા પરિભાષિતઃ ।
રામો રાજીવપત્રાક્ષો લક્ષ્મણેન ચ સીતયા ॥ ૨૪॥

યત્ર રામસ્ત્વયા દૃષ્ટસ્તત્ર માં નય સુવ્રત ।
સીતયા સહિતો યત્ર સુપ્તસ્તદ્દર્શયસ્વ મે ॥ ૨૫॥

ત્વં રામસ્ય પ્રિયતમો ભક્તિમાનસિ ભાગ્યવાન્ ।
ઇતિ સંસ્મૃત્ય સંસ્મૃત્ય રામં સાશ્રુવિલોચનઃ ॥ ૨૬॥

ગુહેન સહિતસ્તત્ર યત્ર રામઃ સ્થિતો નિશિ ।
યયૌ દદર્શ શયનસ્થલં કુશસમાસ્તૃતમ્ ॥ ૨૭॥

સીતાઽઽભરણસંલગ્નસ્વર્ણબિન્દુભિરર્ચિતમ્ ।
દુઃખસન્તપ્તહૃદયો ભરતઃ પર્યદેવયત્ ॥ ૨૮॥

અહોઽતિસુકુમારી યા સીતા જનકનન્દિની ।
પ્રાસાદે રત્નપર્યઙ્કે કોમલાસ્તરણે શુભે ॥ ૨૯॥

રામેણ સહિતા શેતે સા કથં કુશવિષ્ટરે ।
સીતા રામેણ સહિતા દુઃખેન મમ દોષતઃ ॥ ૩૦॥

ધિઙ્માં જાતોઽસ્મિ કૈકેય્યા પાપરાશિસમાનતઃ ।
મન્નિમિત્તમિદં ક્લેશં રામસ્ય પરમાત્મનઃ ॥ ૩૧॥

અહોઽતિસફલં જન્મ લક્ષ્મણસ્ય મહાત્મનઃ ।
રામમેવ સદાન્વેતિ વનસ્થમપિ હૃષ્ટધીઃ ॥ ૩૨॥

અહં રામસ્ય દાસા યે તેષાં દાસસ્ય કિઙ્કરઃ ।
યદિ સ્યાં સફલં જન્મ મમ ભૂયાન્ન સંશયઃ ॥ ૩૩॥

ભ્રાતર્જાનાસિ યદિ તત્કથયસ્વ મમાખિલમ્ ।
યત્ર તિષ્ઠતિ તત્રાહં ગચ્છામ્યાનેતુમઞ્જસા ॥ ૩૪॥

ગુહસ્તં શુદ્ધહૃદયં જ્ઞાત્વા સસ્નેહમબ્રવીત્ ।
દેવ ત્વમેવ ધન્યોઽસિ યસ્ય તે ભક્તિરીદૃશી ॥ ૩૫॥

રામે રાજીવપત્રાક્ષે સીતાયાં લક્ષ્મણે તથા ।
ચિત્રકૂટાદ્રિનિકટે મન્દાકિન્યવિદૂરતઃ ॥ ૩૬॥

મુનીનામાશ્રમપદે રામસ્તિષ્ઠતિ સાનુજઃ ।
જાનક્યા સહિતો નન્દાત્સુખમાસ્તે કિલ પ્રભુઃ ॥ ૩૭॥

તત્ર ગચ્છામહે શીઘ્રં ગઙ્ગાં તર્તુમિહાર્હસિ ।
ઇત્યુક્ત્વા ત્વરિતં ગત્વા નાવઃ પઞ્ચશતાનિ હ ॥ ૩૮॥

સમાનયત્સસૈન્યસ્ય તર્તું ગઙ્ગાં મહાનદીમ્ ।
સ્વયમેવાનિનાયૈકાં રાજનાવં ગુહસ્તદા ॥ ૩૯॥

આરોપ્ય ભરતં તત્ર શત્રુઘ્નં રામમાતરમ્ ।
વસિષ્ઠં ચ તથાન્યત્ર કૈકેયીં ચાન્યયોષિતઃ ॥ ૪૦॥

તીર્ત્વા ગઙ્ગાં યયૌ શીઘ્રં ભરદ્વાજાશ્રમં પ્રતિ ।
દૂરે સ્થાપ્ય મહાસૈન્યં ભરતઃ સાનુજો યયૌ ॥ ૪૧॥

આશ્રમે મુનિમાસીનં જ્વલન્તમિવ પાવકમ્ ।
દૃષ્ટ્વા નનામ ભરતઃ સાષ્ટાઙ્ગમતિભક્તિતઃ ॥ ૪૨॥

જ્ઞાત્વા દાશરથિં પ્રીત્યા પૂજયામાસ મૌનિરાટ્ ।
પપ્રચ્છ કુશલં દૃષ્ટ્વા જટાવલ્કલધારિણમ્ ॥ ૪૩॥

રાજ્યં પ્રશાસતસ્તેઽદ્ય કિમેતદ્વલ્કલાદિકમ્ ।
આગતોઽસિ કિમર્થં ત્વં વિપિનં મુનિસેવિતમ્ ॥ ૪૪॥

ભરદ્વાજવચઃ શ્રુત્વા ભરતઃ સાશ્રુલોચનઃ ।
સર્વં જાનાસિ ભગવન્ સર્વભૂતાશયસ્થિતઃ ॥ ૪૫॥

તથાપિ પૃચ્છસે કિઞ્ચિત્તદનુગ્રહ એવ મે ।
કૈકેય્યા યત્કૃતં કર્મ રામરાજ્યવિઘાતનમ્ ॥ ૪૬॥

વનવાસાદિકં વાપિ ન હિ જાનામિ કિઞ્ચન ।
ભવત્પાદયુગં મેઽદ્ય પ્રમાણં મુનિસત્તમ ॥ ૪૭॥

ઇત્યુક્ત્વા પાદયુગલં મુનેઃ સ્પૃષ્ટ્વાઽર્ત્તમાનસઃ ।
જ્ઞાતુમર્હસિ માં દેવ શુદ્ધો વાઽશુદ્ધ એવ વા ॥ ૪૮॥

મમ રાજ્યેન કિં સ્વામિન્ રામે તિષ્ઠતિ રાજનિ ।

કિઙ્કરોઽહં મુનિશ્રેષ્ઠ રામચન્દ્રસ્ય શાશ્વતઃ ॥ ૪૯॥

અતો ગત્વા મુનિશ્રેષ્ઠ રામસ્ય ચરણાન્તિકે ।
પતિત્વા રાજ્યસમ્ભારાન્ સમર્પ્યાત્રૈવ રાઘવમ્ ॥ ૫૦॥

અભિષેક્ષ્યે વસિષ્ઠાદ્યૈઃ પૌરજાનપદૈઃ સહ ।
નેષ્યેઽયોધ્યાં રમાનાથં દાસઃ સેવેઽતિનીચવત્ ॥ ૫૧॥

ઇત્યુદીરિતમાકર્ણ્ય ભરતસ્ય વચો મુનિઃ ।
આલિઙ્ગ્ય મૂર્ધ્ન્યવઘ્રાય પ્રશશંસ સવિસ્મયઃ ॥ ૫૨॥

વત્સ જ્ઞાતં પુરૈવૈતદ્ભવિષ્યં જ્ઞાનચક્ષુષા ।
મા શુચસ્ત્વં પરો ભક્તઃ શ્રીરામે લક્ષ્મણાદપિ ॥ ૫૩॥

આતિથ્યં કર્તુમિચ્છામિ સસૈન્યસ્ય તવાનઘ ।
અદ્ય ભુક્ત્વા સસૈન્યસ્ત્વં શ્વો ગન્તા રામસન્નિધિમ્ ॥ ૫૪॥

યથાઽઽજ્ઞાપયતિ ભવાન્સ્તથેતિ ભરતોઽબ્રવીત્ ।
ભરદ્વાજસ્ત્વપઃ સ્પૃષ્ટ્વા મૌની હોમગૃહે સ્થિતઃ ॥ ૫૫॥

દધ્યૌ કામદુઘાં કામવર્ષિણીં કામદો મુનિઃ ।
અસૃજત્કામધુક્ સર્વં યથાકામમલૌકિકમ્ ॥ ૫૬॥

ભરતસ્ય સસૈન્યસ્ય યથેષ્ટં ચ મનોરથમ્ ।
યથા વવર્ષ સકલં તૃપ્તાસ્તે સર્વસૈનિકાઃ ॥ ૫૭॥

વસિષ્ઠં પૂજયિત્વાગ્રે શાસ્ત્રદૃષ્ટેન કર્મણા ।
પશ્ચાત્સસૈન્યં ભરતં તર્પયામાસ યોગિરાટ્ ॥ ૫૮॥

ઉષિત્વા દિનમેકં તુ આશ્રમે સ્વર્ગસન્નિભે ।
અભિવાદ્ય પુનઃ પ્રાતર્ભરદ્વાજં સહાનુજઃ ॥ ૫૯॥

ભરતસ્તુ કૃતાનુજ્ઞઃ પ્રયયૌ રામસન્નિધિમ્ ।
ચિત્રકૂટમનુપ્રાપ્ય દૂરે સંસ્થાપ્ય સૈનિકાન્ ।
રામસન્દર્શનાકાઙ્ક્ષી પ્રયયૌ ભરતઃ સ્વયમ્ ॥ ૬૦॥

શત્રુઘ્નેન સુમન્ત્રેણ ગુહેન ચ પરન્તપઃ ।
તપસ્વિમણ્ડલં સર્વં વિચિન્વાનો ન્યવર્તત ॥ ૬૧॥

અદૃષ્ટ્વા રામભવનમપૃચ્છદૃષિમણ્ડલમ્ ।
કુત્રાસ્તે સીતયા સાર્ધં લક્ષ્મણેન રઘૂત્તમઃ ॥ ૬૨॥

ઊચુરગ્રે ગિરેઃ પશ્ચાદ્ગઙ્ગાયા ઉત્તરે તટે ।
વિવિક્તં રામસદનં રમ્યં કાનનમણ્ડિતમ્ ॥ ૬૩॥

સફલૈરામ્રપનસૈઃ કદલીખણ્ડસંવૃતમ્ ।
ચમ્પકૈઃ કોવિદારૈશ્ચ પુન્નાગૈર્વિપુલૈસ્તથા ॥ ૬૪॥

એવં દર્શિતમાલોક્ય મુનિભિર્ભરતોઽગ્રતઃ ।
હર્ષાદ્યયૌ રઘુશ્રેષ્ઠભવનં મન્ત્રિણા સહ ॥ ૬૫॥

દદર્શ દૂરાદતિભાસુરં શુભં
રામસ્ય ગેહં મુનિવૃન્દસેવિતમ્ ।
વૃક્ષાગ્રસંલગ્નસુવલ્કલાજિનં
રામાભિરામં ભરતઃ સહાનુજઃ ॥ ૬૬॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અયોધ્યાકાણ્ડે અષ્ટમઃ સર્ગઃ ॥ ૮॥

## ॥ નવમઃ સર્ગઃ ॥

અથ ગત્વાઽઽશ્રમપદસમીપં ભરતો મુદા ।
સીતારામપદૈર્યુક્તં પવિત્રમતિશોભનમ્ ॥ ૧॥

સ તત્ર વજ્રાઙ્કુશવારિજાઞ્ચિત-
ધ્વજાદિચિહ્નાનિ પદાનિ સર્વતઃ ।
દદર્શ રામસ્ય ભુવોઽતિમઙ્ગલાનિ
અચેષ્ટયત્પાદરજઃસુ સાનુજઃ ॥ ૨॥

અહો સુધન્યોઽહમમૂનિ
રામપાદારવિન્દાઙ્કિતભૂતલાનિ ।
પશ્યામિ યત્પાદરજો વિમૃગ્યં
બ્રહ્માદિદેવૈઃ શ્રુતિભિશ્ચ નિત્યમ્ ॥ ૩॥

ઇત્યદ્ભુતપ્રેમરસાપ્લુતાશયો
વિગાઢચેતા રઘુનાથભાવને ।
આનન્દજાશ્રુસ્નપિતસ્તનાન્તરઃ

શનૈરવાપાશ્રમસન્નિધિં હરેઃ ॥ ૪॥

સ તત્ર દૃષ્ટ્વા રઘુનાથમાસ્થિતં
દૂર્વાદલશ્યામલમાયતેક્ષણમ્ ।
જટાકિરીટં નવવલ્કલામ્બરં
પ્રસન્નવક્ત્રં તરુણારુણદ્યુતિમ્ ॥ ૫॥

વિલોકયન્તં જનકાત્મજાં શુભાં
સૌમિત્રિણા સેવિતપાદપઙ્કજમ્ ।
તદાભિદુદ્રાવ રઘૂત્તમં શુચા
હર્ષાચ્ચ તત્પાદયુગં ત્વરાગ્રહીત્ ॥ ૬॥

રામસ્તમાકૃષ્ય સુદીર્ઘબાહુર્દોર્ભ્યાં
પરિષ્વજ્ય સિષિચ્ચ નેત્રજૈઃ ।
જલૈરથાઙ્કોપરિ સન્ન્યવેશયત્
પુનઃ પુનઃ સમ્પરિષસ્વજે વિભુઃ ॥ ૭॥

અથ તા માતરઃ સર્વાઃ સમાજગ્મુસ્ત્વરાન્વિતાઃ ।
રાઘવં દ્રષ્ટુકામાસ્તાસ્તૃષાર્તા ગૌર્યથા જલમ્ ॥ ૮॥

રામઃ સ્વમાતરં વીક્ષ્ય દ્રુતમુત્થાય પાદયોઃ ।
વવન્દે સાશ્રુ સા પુત્રમાલિઙ્ગ્યાતીવ દુઃખિતા ॥ ૯॥

ઇતરાશ્ચ તથા નત્વા જનની રઘુનન્દનઃ ।
તતઃ સમાગતં દૃષ્ટ્વા વસિષ્ઠં મુનિપુઙ્ગવમ્ ॥ ૧૦॥

સાષ્ટાઙ્ગં પ્રણિપત્યાહ ધન્યોઽસ્મીતિ પુનઃ પુનઃ ।
યથાર્હમુપવેશ્યાહ સર્વાનેવ રઘૂદ્વહઃ ॥ ૧૧॥

પિતા મે કુશલી કિં વા માં કિમાહાતિદુઃખિતઃ ।
વસિષ્ઠસ્તમુવાચેદં પિતા તે રઘુનન્દન ॥ ૧૨॥

ત્વદ્વિયોગાભિતપ્તાત્મા ત્વામેવ પરિચિન્તયન્ ।
રામરામેતિ સીતેતિ લક્ષ્મણેતિ મમાર હ ॥ ૧૩॥

શ્રુત્વા તત્કર્ણશૂલાભં ગુરોર્વચનમઞ્જસા ।
હા હતોઽસ્મીતિ પતિતો રુદન્ રામઃ સલક્ષ્મણઃ ॥ ૧૪॥

તતોઽનુરુરુદુઃ સર્વા માતરશ્ચ તથાપરે ।

હા તાત માં પરિત્યજ્ય ક્વ ગતોઽસિ ઘૃણાકર ॥ ૧૫॥

અનાથોઽસ્મિ મહાબાહો માં કો વા લાલયેદિતઃ ।
સીતા ચ લક્ષ્મણશ્ચૈવ વિલેપતુરતો ભૃશમ્ ॥ ૧૬॥

વસિષ્ઠઃ શાન્તવચનૈઃ શમયામાસ તાં શુચમ્ ।
તતો મન્દાકિનીં ગત્વા સ્નાત્વા તે વીતકલ્મષાઃ ॥ ૧૭॥

રાજ્ઞે દદુર્જલં તત્ર સર્વે તે જલકાઙ્ક્ષિણે ।
પિણ્ડાન્નિર્વાપયામાસ રામો લક્ષ્મણસંયુતઃ ॥ ૧૮॥

ઇઙ્ગુદીફલપિણ્યાકરચિતાન્મધુસમ્પ્લુતાન્ ।
વયં યદન્નાઃ પિતરસ્તદન્નાઃ સ્મૃતિનોદિતાઃ ॥ ૧૯॥

ઇતિ દુખાશ્રુપૂર્ણાક્ષઃ પુનઃ સ્નાત્વા ગૃહં યયૌ ।
સર્વે રુદિત્વા સુચિરં સ્નાત્વા જગ્મુસ્તદાશ્રમમ્ ॥ ૨૦॥

તસ્મિન્સ્તુ દિવસે સર્વે ઉપવાસં પ્રચક્રિરે ।
તતઃ પરેદ્યુર્વિમલે સ્નાત્વા મન્દાકિનીજલે ॥ ૨૧॥

ઉપવિષ્ટં સમાગમ્ય ભરતો રામમબ્રવીત્ ।
રામ રામ મહાભાગ સ્વાત્માનમભિષેચય ॥ ૨૨॥

રાજ્યં પાલય પિત્ર્યં તે જ્યેષ્ઠસ્ત્વં મે પિતા તથા ।
ક્ષત્રિયાણામયં ધર્મો યત્પ્રજાપરિપાલનમ્ ॥ ૨૩॥

ઇષ્ટ્વા યજ્ઞૈર્બહુવિધૈઃ પુત્રાનુત્પાદ્ય તન્તવે ।
રાજ્યે પુત્રં સમારોપ્ય ગમિષ્યસિ તતો વનમ્ ॥ ૨૪॥

ઇદાનીં વનવાસસ્ય કાલો નૈવ પ્રસીદ મે ।
માતુર્મે દુષ્કૃતં કિઞ્ચિત્સ્મર્તું નાર્હસિ પાહિ નઃ ॥ ૨૫॥

ઇત્યુક્ત્વા ચરણૌ ભ્રાતુઃ શિરસ્યાધાય ભક્તિતઃ ।
રામસ્ય પુરતઃ સાક્ષાદ્દણ્ડવત્પતિતો ભુવિ ॥ ૨૬॥

ઉત્થાપ્ય રાઘવઃ શીઘ્રમારોપ્યાઙ્કેઽતિભક્તિતઃ ।
ઉવાચ ભરતં રામઃ સ્નેહાર્દ્રનયનઃ શનૈઃ ॥ ૨૭॥

શૃણુ વત્સ પ્રવક્ષ્યામિ ત્વયોક્તં યત્તથૈવ તત્ ।
કિન્તુ મામબ્રવીત્તાતો નવ વર્ષાણિ પઞ્ચ ચ ॥ ૨૮॥

ઉષિત્વા દણ્ડકારણ્યે પુરં પશ્ચાત્સમાવિશ ।
ઇદાનીં ભરતાયેદં રાજ્યં દત્તં મયાખિલમ્ ॥ ૨૯॥

તતઃ પિત્રૈવ સુવ્યક્તં રાજ્યં દત્તં તવૈવ હિ ।
દણ્ડકારણ્યરાજ્યં મે દત્તં પિત્રા તથૈવ ચ ॥ ૩૦॥

અતઃ પિતુર્વચઃ કાર્યમાવાભ્યામતિયત્નતઃ ।
પિતુર્વચનમુલ્લઙ્ઘ્ય સ્વતન્ત્રો યસ્તુ વર્તતે ॥ ૩૧॥

સ જીવન્નેવ મૃતકો દેહાન્તે નિરયં વ્રજેત્ ।
તસ્માદ્રાજ્યં પ્રશાધિ ત્વં વયં દણ્ડકપાલકાઃ ॥ ૩૨॥

ભરતસ્ત્વબ્રવીદ્રામં કામુકો મૂઢધીઃ પિતા ।
સ્ત્રીજિતો ભ્રાન્તહૃદય ઉન્મત્તો યદિ વક્ષ્યતિ ।
તત્સત્યમિતિ ન ગ્રાહ્યં ભ્રાન્તવાક્યં યથા સુધીઃ ॥ ૩૩॥

શ્રીરામ ઉવાચ
ન સ્ત્રીજિતઃ પિતા બ્રૂયાન્ન કામી નૈવ મૂઢધીઃ ।
પૂર્વં પ્રતિશ્રુતં તસ્ય સત્યવાદી દદૌ ભયાત્ ॥ ૩૪॥

અસત્યાદ્ભીતિરધિકા મહતાં નરકાદપિ ।
કરોમીત્યહમપ્યેતત્સત્યં તસ્યૈ પ્રતિશ્રુતમ્ ॥ ૩૫॥

કથં વાક્યમહં કુર્યામસત્યં રાઘવો હિ સન્ ।
ઇત્યુદીરિતમાકર્ણ્ય રામસ્ય ભરતોઽબ્રવીત્ ॥ ૩૬॥

શ્રીભરત ઉવાચ
તથૈવ ચીરવસનો વને વત્સ્યામિ સુવ્રત ।
ચતુર્દશ સમાસ્ત્વં તુ રાજ્યં કુરુ યથાસુખમ્ ॥ ૩૭॥

શ્રીરામ ઉવાચ
પિત્રા દત્તં તવૈવૈતદ્રાજ્યં મહ્યં વનં દદૌ ।
વ્યત્યયં યદ્યહં કુર્યામસત્યં પૂર્વવત્ સ્થિતમ્ ॥ ૩૮॥

અહમપ્યાગમિષ્યામિ સેવે ત્વાં લક્ષ્મણો યથા ।
નોચેત્પ્રાયોપવેશેન ત્યજામ્યેતત્કલેવરમ્ ॥ ૩૯॥

ઇત્યેવં નિશ્ચયં કૃત્વા દર્ભાનાસ્તીર્ય ચાતપે ।
મનસાપિ વિનિશ્ચિત્ય પ્રાઙ્મુખોપવિવેશ સઃ ॥ ૪૦॥

ભરતસ્યાપિ નિર્બન્ધં દૃષ્ટ્વા રામોઽતિવિસ્મિતઃ ।
નેત્રાન્તસઞ્જ્ઞાં ગુરવે ચકાર રઘુનન્દનઃ ॥ ૪૧॥

એકાન્તે ભરતં પ્રાહ વસિષ્ઠો જ્ઞાનિનાં વરઃ ।
વત્સ ગુહ્યં શૃણુષ્વેદં મમ વાક્યાત્સુનિશ્ચિતમ્ ॥ ૪૨॥

રામો નારાયણઃ સાક્ષાદ્બ્રહ્મણા યાચિતઃ પુરા ।
રાવણસ્ય વધાર્થાય જાતો દશરથાત્મજઃ ॥ ૪૩॥

યોગમાયાપિ સીતેતિ જાતા જનકનન્દિની ।
શેષોઽપિ લક્ષ્મણો જાતો રામમન્વેતિ સર્વદા ॥ ૪૪॥

રાવણં હન્તુકામાસ્તે ગમિષ્યન્તિ ન સંશયઃ ।
કૈકેય્યા વરદાનાદિ યદ્યન્નિષ્ઠુરભાષણમ્ ॥ ૪૫॥

સર્વં દેવકૃતં નો ચેદેવં સા ભાષયેત્કથમ્ ।
તસ્માત્ત્યજાઽઽગ્રહં તાત રામસ્ય વિનિવર્તને ॥ ૪૬॥

નિવર્તસ્વ મહાસૈન્યૈર્ભ્રાતૃભિઃ સહિતઃ પુરમ્ ।
રાવણં સકુલં હત્વા શીઘ્રમેવાગમિષ્યતિ ॥ ૪૭॥

ઇતિ શ્રુત્વા ગુરોર્વાક્યં ભરતો વિસ્મયાન્વિતઃ ।
ગત્વા સમીપં રામસ્ય વિસ્મયોત્ફુલ્લલોચનઃ ॥ ૪૮॥

પાદુકે દેહિ રાજેન્દ્ર રાજ્યાય તવ પૂજિતે ।
તયોઃ સેવાં કરોમ્યેવ યાવદાગમનં તવ ॥ ૪૯॥

ઇત્યુક્ત્વા પાદુકે દિવ્યે યોજયામાસ પાદયોઃ ।
રામસ્ય તે દદૌ રામો ભરતાયાતિભક્તિતઃ ॥ ૫૦॥

ગૃહીત્વા પાદુકે દિવ્યે ભરતો રત્નભૂષિતે ।
રામં પુનઃ પરિક્રમ્ય પ્રણનામ પુનઃ પુનઃ ॥ ૫૧॥

ભરતઃ પુનરાહેદં ભક્ત્યા ગદ્ગદયા ગિરા ।
નવપઞ્ચસમાન્તે તુ પ્રથમે દિવસે યદિ ॥ ૫૨॥

નાગમિષ્યસિ ચેદ્રામ પ્રવિશામિ મહાનલમ્ ।
બાઢમિત્યેવ તં રામો ભરતં સન્ન્યવર્તયત્ ॥ ૫૩॥

સસૈન્યઃ સવસિષ્ઠશ્ચ શત્રુઘ્નસહિતઃ સુધીઃ ।
માતૃભિર્મન્ત્રિભિઃ સાર્ધં ગમનાયોપચક્રમે ॥ ૫૪॥

કૈકેયી રામમેકાન્તે સ્રવન્નેત્રજલાકુલા ।
પ્રાઞ્જલિઃ પ્રાહ હે રામ તવ રાજ્યવિઘાતનમ્ ॥ ૫૫॥

કૃતં મયા દુષ્ટધિયા માયામોહિતચેતસા ।
ક્ષમસ્વ મમ દૌરાત્મ્યં ક્ષમાસારા હિ સાધવઃ ॥ ૫૬॥

ત્વં સાક્ષાદ્વિષ્ણુરવ્યક્તઃ પરમાત્મા સનાતનઃ ।
માયામાનુષરૂપેણ મોહયસ્યખિલં જગત્ ।
ત્વયૈવ પ્રેરિતો લોકઃ કુરુતે સાધ્વસાધુ વા ॥ ૫૭॥

ત્વદધીનમિદં વિશ્વમસ્વતન્ત્રં કરોતિ કિમ્ ।
યથા કૃત્રિમનર્તક્યો નૃત્યન્તિ કુહકેચ્છયા ॥ ૫૮॥

ત્વદધીના તથા માયા નર્તકી બહુરૂપિણી ।
ત્વયૈવ પ્રેરિતાહં ચ દેવકાર્યં કરિષ્યતા ॥ ૫૯॥

પાપિષ્ઠં પાપમનસા કર્માચરમરિન્દમ ।
અદ્ય પ્રતીતોઽસિ મમ દેવાનામપ્યગોચરઃ ॥ ૬૦॥

પાહિ વિશ્વેશ્વરાનન્ત જગન્નાથ નમોઽસ્તુ તે ।
છિન્ધિ સ્નેહમયં પાશં પુત્રવિત્તાદિગોચરમ્ ॥ ૬૧॥

ત્વજ્જ્ઞાનાનલખડ્ગેન ત્વામહં શરણં ગતા ।
કૈકેય્યા વચનં શ્રુત્વા રામઃ સસ્મિતમબ્રવીત્ ॥ ૬૨॥

યદાહ માં મહાભાગે નાનૃતં સત્યમેવ તત્ ।
મયૈવ પ્રેરિતા વાણી તવ વક્ત્રાદ્વિનિર્ગતા ॥ ૬૩॥

દેવકાર્યાર્થસિદ્ધ્યર્થમત્ર દોષઃ કુતસ્તવ ।
ગચ્છ ત્વં હૃદિ માં નિત્યં ભાવયન્તી દિવાનિશમ્ ॥ ૬૪॥

સર્વત્ર વિગતસ્નેહા મદ્ભક્ત્યા મોક્ષ્યસેઽચિરાત્ ।
અહં સર્વત્ર સમદૃગ્ દ્વેષ્યો વા પ્રિય એવ વા ॥ ૬૫॥

નાસ્તિ મે કલ્પકસ્યેવ ભજતોઽનુભજામ્યહમ્ ।
મન્માયામોહિતધિયો મામમ્બ મનુજાકૃતિમ્ ॥ ૬૬॥

સુખદુઃખાદ્યનુગતં જાનન્તિ ન તુ તત્ત્વતઃ ।
દિષ્ટ્યા મદ્ગોચરં જ્ઞાનમુત્પન્નં તે ભવાપહમ્ ॥ ૬૭॥

સ્મરન્તી તિષ્ઠ ભવને લિપ્યસે ન ચ કર્મભિઃ ।
ઇત્યુક્ત્વા સા પરિક્રમ્ય રામં સાનન્દવિસ્મયા ॥ ૬૮॥

પ્રણમ્ય શતશો ભૂમૌ યયૌ ગેહં મુદાન્વિતા ।
ભરતસ્તુ સહામાત્યૈર્માતૃભિર્ગુરુણા સહ ॥ ૬૯॥

અયોધ્યામગમચ્છીઘ્રં રામમેવાનુચિન્તયન્ ।
પૌરજાનપદાન્ સર્વાનયોધ્યાયામુદારધીઃ ॥ ૭૦॥

સ્થાપયિત્વા યથાન્યાયં નન્દિગ્રામં યયૌ સ્વયમ્ ।
તત્ર સિંહાસને નિત્યં પાદુકે સ્થાપ્ય ભક્તિતઃ ॥ ૭૧॥

પૂજયિત્વા યથા રામં ગન્ધપુષ્પાક્ષતાદિભિઃ ।
રાજોપચારૈરખિલૈઃ પ્રત્યહં નિયતવ્રતઃ ॥ ૭૨॥

ફલમૂલાશનો દાન્તો જટાવલ્કલધારકઃ ।
અધઃશાયી બ્રહ્મચારી શત્રુઘ્નસહિતસ્તદા ॥ ૭૩॥

રાજકાર્યાણિ સર્વાણિ યાવન્તિ પૃથિવીતલે ।
તાનિ પાદુકયોઃ સમ્યઙ્નિવેદયતિ રાઘવઃ ॥ ૭૪॥

ગણયન્ દિવસાન્યેવ રામાગમનકાઙ્ક્ષયા ।
સ્થિતો રામાર્પિતમનાઃસાક્ષાદ્બ્રહ્મમુનિર્યથા ॥ ૭૫॥

રામસ્તુ ચિત્રકૂટાદ્રૌ વસન્મુનિભિરાવૃતઃ ।
સીતયા લક્ષ્મણેનાપિ કિઞ્ચિત્કાલમુપાવસત્ ॥ ૭૬॥

નાગરાશ્ચ સદા યાન્તિ રામદર્શનલાલસાઃ ।
ચિત્રકૂટસ્થિતં જ્ઞાત્વા સીતયા લક્ષ્મણેન ચ ॥ ૭૭॥

દૃષ્ટ્વા તજ્જનસમ્બાધં રામસ્તત્યાજ તં ગિરિમ્ ।
દણ્ડકારણ્યગમને કાર્યમપ્યનુચિન્તયન્ ॥ ૭૮॥

અન્વગાત્સીતયા ભ્રાત્રા હ્યત્રેરાશ્રમમુત્તમમ્ ।
સર્વત્ર સુખસંવાસં જનસમ્બાધવર્જિતમ્ ॥ ૭૯॥

ગત્વા મુનિમુપાસીનં ભાસયન્તં તપોવનમ્ ।
દણ્ડવત્પ્રણિપત્યાહ રામોઽહમભિવાદયે ॥ ૮૦॥

પિતુરાજ્ઞાં પુરસ્કૃત્ય દણ્ડકાનનમાગતઃ ।
વનવાસમિષેણાપિ ધન્યોઽહં દર્શનાત્તવ ॥ ૮૧॥

શ્રુત્વા રામસ્ય વચનં રામં જ્ઞાત્વા હરિં પરમ્ ।
પૂજયામાસ વિધિવદ્ભક્ત્યા પરમયા મુનિઃ ॥ ૮૨॥

વન્યૈઃ ફલૈઃ કૃતાતિથ્યમુપવિષ્ટં રઘૂત્તમમ્ ।
સીતાં ચ લક્ષ્મણં ચૈવ સન્તુષ્ટો વાક્યમબ્રવીત્ ॥ ૮૩॥

ભાર્યા મેઽતીવ સંવૃદ્ધા હ્યનસૂયેતિ વિશ્રુતા ।
તપશ્ચરન્તી સુચિરં ધર્મજ્ઞા ધર્મવત્સલા ॥ ૮૪॥

અન્તસ્તિષ્ઠતિ તાં સીતા પશ્યત્વરિનિષૂદન ।
તથેતિ જાનકીં પ્રાહ રામો રાજીવલોચનઃ ॥ ૮૫॥

ગચ્છ દેવીં નમસ્કૃત્ય શીઘ્રમેહિ પુનઃ શુભે ।
તથેતિ રામવચનં સીતા ચાપિ તથાકરોત્ ॥ ૮૬॥

દણ્ડવત્પતિતામગ્રે સીતાં દૃષ્ટ્વાતિહૃષ્ટધીઃ ।
અનસૂયા સમાલિઙ્ગ્ય વત્સે સીતેતિ સાદરમ્ ॥ ૮૭॥

દિવ્યે દદૌ કુણ્ડલે દ્વે નિર્મિતે વિશ્વકર્મણા ।
દુકૂલે દ્વે દદૌ તસ્યૈ નિર્મલે ભક્તિસંયુતા ॥ ૮૮॥

અઙ્ગરાગં ચ સીતાયૈ દદૌ દિવ્યં શુભાનના ।
ન ત્યક્ષ્યતેઽઙ્ગરાગેણ શોભા ત્વાં કમલાનને ॥ ૮૯॥

પાતિવ્રત્યં પુરસ્કૃત્ય રામમન્વેહિ જાનકિ ।
કુશલી રાઘવો યાતુ ત્વયા સહ પુનર્ગૃહમ્ ॥ ૯૦॥

ભોજયિત્વા યથાન્યાયં રામં સીતાસમન્વિતમ્ ।
લક્ષ્મણં ચ તદા રામં પુનઃ પ્રાહ કૃતાઞ્જલિઃ ॥ ૯૧॥

રામ ત્વમેવ ભુવનાનિ વિધાય તેષાં
સંરક્ષણાય સુરમાનુષતિર્યગાદીન્ ।
દેહાન્ બિભર્ષિ ન ચ દેહગુણૈર્વિલિપ્તસ્-
ત્વત્તો બિભેત્યખિલમોહકરી ચ માયા ॥ ૯૩॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
અયોધ્યાકાણ્ડે નવમઃ સર્ગઃ ॥ ૯॥

સમાપ્તમિદમયોધ્યાકાણ્ડમ્

Encoded and proofread by Nagaraj Balijepalli nagaraj at iastate.edu
Proofread by Sunder Hattangadi
Revised by Agne Easwaran easwaranpsa at rediffmail.com and
ahimsasoldier at gmail.com

*adhyAtmarAmAyaNe ayodhyAkANDam*

pdf was typeset on September 29, 2018

Please send corrections to *sanskrit@cheerful.com*